DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFOJI'S

SARASVATI MAHĀL LIBRARY

TANJORE.

VOL. XX - MANTRA SASTRA

COMPILED BY

K. S. SUBRAHMANYA SASTRY,

PANDIT, SARASVATI MAHAL LIBRARY,

TANJORE.

PUBLISHED BY

S. GOPALAN, B. A., B. L.,

HONORARY SECRETARY, FOR THE ADMINISTRATIVE COMMITTEE

T. M. S. S. M. LIBRARY,

TANJORE.

1952

[Price Rs. 12/-

PREFACE.

This, the 20th volume of the Descriptive Catalogue of Sanskrit manuscripts in the Saraswati Mahāl Library, gives a complete list with description of all the Mantra Manuscripts in the Library. This collection contains 547 Palm leaf manuscripts and 773 Paper manuscripts.

The Palm leaf manuscripts are very old and many of them are in a damaged condition. Their identification and description, therefore, remained unfinished. But they contain valuable materials. Pandits who are deeply versed in Mantra Sastra and have the knowledge of traditional practice are very rare, and it is a piece of good fortune that our Library found in its staff a fully qualified pandit, Sri K. S. Subramania Sastri and entrusted him with the work.

The Paper manuscripts contain not only the collection locally made by the Rajas of Tanjore but also the All-India collection made by Rājah Serfoji II (1798—1832) the scholar-king who has made substantial additions to this library and whose name has rightly been given to it. Even among the Paper manuscripts, there are some that have lost some of their front and back leaves and require an intimate acquaintance with the subject for their identification.

The learned compiler has to be congratulated on his having identified almost all the manuscripts and our thanks are due to him for his valuable services.

We are grateful to the Government of Madras for their liberal grants that have enabled us to undertake the publication of this Catalogue and many rare and useful Manuscripts of this Library.

Saraswatī Mahāl,
Tanjore,
4-9-'52.

S. GOPALAN,
Honorary Secretary.

श्रीगणेशाय नमः ॥

॥ आवेदनम् ॥



अत्र हि श्रीमद्भारतदेशललामभूते श्रीमत्तञ्जपुरीविराजमानेऽस्मिन् महति श्रीसरस्वतीमहालये विद्यमानानां चोळाधीश्वरैस्सम्पाद्य संरक्षितानां सर्वेषामपि ग्रन्थानां, डाक्टेर् श्रीबरनेल् महाशयैस्सम्पाद्य मुद्रिता सूचिकैव प्रमाणं भवति। अतस्ते ग्रन्थाः B. No. इति कृतसाङ्केतिकसंज्ञाः प्रकाशन्ते। ततोऽर्वाचीनेषु कालेषु अस्य श्रीसरस्वतीमहालयस्यार्थे बहुभिर्महाशयैस्सामोदं समर्पिता ग्रन्थाः परश्शतं भवन्ति। अतस्तेषां ग्रन्थानामपि दातृनामानुरोधेन सूचिकासु संज्ञाश्च दत्ता भवन्ति। ये चैताभ्यः सूचिकाभ्यः परिभ्रष्टा ग्रन्थाः तेषां सर्वेषामप्यविशेषेण श्री O. S. रामस्वामिशास्त्रिभिर्महाशयैः (Ex-Librarian) सूचिका संपादिता। अतस्ते ग्रन्थाः O. S. R. No. इति संज्ञया व्यवह्रियन्ते। सर्वाभ्योऽपि सूचिकाभ्यो ये परिभ्रष्टा ग्रन्थास्तेषां No. less. इति, संख्याविहीनानां ग्रन्थानां no Nil इति च संज्ञा दत्तेत्यवधेयम्। ताश्च संज्ञा यथाक्रममत्रोपपाद्यन्ते ॥ यथा—

(1)	श्रीडाक्टेर् बर्नेल्महाशयानां	B. No.
(2)	श्रीजम्बुनाथभट्लाण्डगे महाशयानां	J. L. No.
(3)	श्रीत्यागराजस्वामिमहाशयानां	T. S. No.

(4)	श्रीपतञ्जात्त्रधूतेन्द्राणां	P. A. No.
(5)	श्रीगोपालकृष्णढवळेकर् महाशयानां	G. K. D. No.
(6)	श्रीकृष्णाजी मेता महाशयानां	K. M. No.
(7)	श्री O. S. रामस्वामिशास्त्रिमहाशयानां	O. S. R. No.
(8)	एतासु सूचिकासु अनन्तर्गतानां	No. less. No
(9)	संख्याविहीनानां ग्रन्थानां	No Nil.



Abbreviations used in this Catalogue.

Dr. Burnell's catalogue is the most important list of the Sanskrit Manuscripts collected by the Naik Kings and Maharashtra Kings in this Library. The numbers of the Manuscripts in Burnell's list are referred to as B. No. There have been subsequent additions to the Library Manuscripts donated by learned families in Tanjore and elsewhere. These are listed under the Donor's names and called after them (e. g.) J. L. No. for the manuscripts donated by JAMBUNATH BHAT LANDAGE. A number of manuscripts that have been left out by Dr. Burnell have been subsequently listed by Mr. O. S. RAMASWAMI SASTRI, a former Librarain of this Library. These manuscripts are referred as O. S. R. No. There are some paper manuscripts that have escaped these lists but have been included in the list kept in each bundle. They have been called 'number-less' manuscripts in these lists and the nomenclature is retained. Lastly there are manuscripts that have no numbers given to them and they are called 'No. Nil' manuscripts. But these last are very few.

The abbreviations are explained hereunder :—

1. Dr. Burnell's catalogue list. B. No.

2. Sri Jambunath Bhat Landage's collection.
J. L. No.

3. Sri Thyagarajaswami's collections. T. S. No.

4. Sri Patanga Avadhoot's collection. P. A. No.

5. Sri Gopalakrishna Dhavalekar's collection.
G. K. D. No.

6. Sri Krishnajee Mehtab collection. K. M. No.

7. Sri O. S. Ramaswami Sastri's list.
O. S. R. No.

8. Manuscripts left out in the list but listed in the bundle. No. Less.

9. Manuscripts that have not been given any number anywhere. No. Nil.

முக்கிய அறிவிப்பு.

தஞ்சை ஸ்ரீ ஸரஸ்வதிமஹால் நூல்நிலயத்தில், நாயக்க, மஹாராஷ்டிர மன்னர்கள் சேமித்துக் காப்பாற்றி வைத்திருக்கும் கையெழுத்து நூல்களுக்கு, டாக்டர் ஸ்ரீ பர்னெல் பதிப்பித்துள்ள காடலாகுதான் முக்கியமானது. ஆகவே அந்நூல்களின் எண்கள் B. No. எனப்படுகின்றன. ஸமீபகாலங்களில் பலர் இந்நூல்நிலயத்திற்கு ஏராளமாக நூல்களை வழங்கி யிருக்கிறார்கள். அவைகளுக்கு, கொடுத்தவர்களின் பெயரே வைக்கப்பட்டிருக்கின்றன. பழைய நூல்களிலும், புதிதாகக்கிடைத்த நூல்களிலும் பலநூல்கள் கணக்கிடப்படாமலிருந்தன. அவைகளுக்கு மாஜி லைப்ரேரியன் ஸ்ரீ O. S. ராமஸ்வாமி சாஸ்திரிகள் காடலாகு செய்திருக்கிறார். ஆகவே அந்நூல்களுக்கு அவர் பெயரே வழங்கப்பட்டிருக்கிறது. இந்த காடலாகுகளில் விடுபட்டுப் பின் எண்கள் கொடுக்கப்பட்டுள்ள நூல்களுக்கு No. less. என்று பெயர் வழக்கத்திலிருந்து வருகிறது. இத்தகைய No. less Mss. பல மூட்டைகளிலிருப்பினும் அந்தஅந்த மூட்டைகளிலுள்ள நூல்களுக்கு தனித்தனி எண்களே கொடுக்கப்பட்டிருக்கின்றன. கீழ்க்கூறிய காடலாகுகளில் முற்றிலும் விடப்பட்டு எண்களும் குறிக்கப்படாத சிற்சில நூல்கள் சில மூட்டைகளில் இருக்கின்றன. அவைகளுக்கு No. Nil என்ற பெயர் வழக்கத்திலிருந்து வருகிறது. அவைகளின் விவரங்கள் கீழே குறிப்பிடப்பட்டிருக்கின்றன :—

(1) டாக்டர் ஸ்ரீ பர்னெல் காடலாகு செ. B. No.

(2) ஸ்ரீ ஜம்புநாத பட் லாண்டகே காடலாகு செ. J. L. No.

(3)	ஸ்ரீ தியாகராஜஸ்வாமி காடலாகு நெ.	T. S. No.
(4)	ஸ்ரீ பதங்காவதூத ஸ்வாமி காடலாகு நெ.	P. A. No.
(5)	ஸ்ரீ கோபால கிருஷ்ண டவளேகர் காடலாகு நெ.	G. K. D. No.
(6)	ஸ்ரீ கிருஷ்ணஜீ மேத்தா காடலாகு நெ.	K. M. No.
(7)	ஸ்ரீ O. S. ராமஸ்வாமி சாஸ்திரிகள் காடலாகு நெ.	O. S. R. No.
(8)	காடலாகுகளில் விடுபட்டு பின் எண்களிடப்பட்டவைகளின் நெ.	No. less No.
(9)	முற்றிலும் விடுபட்டு எண்களும் இல்லாதவைகள்.	No. Nil.

॥ श्रीगणेशाय नमः ॥

भूमिका ॥

(मन्त्रशास्त्रहृदयावेदनम्)



इह खलु जगति, मायोपनिबन्धनेऽस्मिन्संसारे तुषाङ्गारेष्विव परितप्यमानान् जनाननुजिघृक्षुर्भगवान् परमेश्वरः मन्त्रकलापान् प्रकाशयामास। ते हि मन्त्राः श्रुतिस्मृतीतिहासपुराणागमतन्त्रादिषु परश्शतमुपलभ्यन्ते। गते च काले श्रुत्यादीनां तेषां प्रायशस्सञ्जाते दौर्लभ्ये लोकानुग्रहैकपरायणाः श्रीमद्भगवत्पादादयो महान्तः तेभ्यो मुख्यतमान् मन्त्रान् संगृह्य प्रपञ्चसारादिग्रन्थरूपेण प्रकाशयामासुरिति नेदमविदितमावेद्यते विपश्चिताम्। तेषां सर्वेषां ग्रन्थानामलाभेऽपि तञ्जपुरीललामभूते; अथवा भारतदेशललामभूते चोळदेशाधीश्वरैर्महाराजैः स्वस्वकाले महता प्रयासेन संपाद्य संरक्षिते श्रीसरस्वतीमहालयाख्येऽस्मिन् महति भाण्डागारे प्रायेण सर्वेऽपि ते मन्त्रकलापा उपलभ्यन्त एवेति परमिदं प्रमोदस्थानं विपश्चिदपश्चिमानाम्। अतस्ते मन्त्रा यथामत्यत्र विमृश्यन्ते ॥

मन्त्रा ह्यनन्ता भवन्तीत्यतो मन्त्रप्रतिपाद्यमाना देवता अप्यनन्ता एव। ताः किल देवताः मतदेवताः आत्मदेवताः इष्टदेवताः कुलदेवताः गृहदेवताः ग्रामदेवताः लोकदेवताश्चेति विभज्य अभिधीयन्ते। अतो देवताभेदेन मन्त्रा अपि सप्तविधा भवन्ति ॥

गणेशसूर्यशक्तिशिवविष्ण्वाख्यानां पञ्चब्रह्मणां अन्यतमं दैवतं निर्गुणं ब्रह्मेति, अन्यानि दैवतानि तत्कार्यं ब्रह्मेति च भावयन्त उपासनपराः क्रमेण गाणेशास्सौराश्शाक्ताश्शैवा वैष्णवा इति; पञ्चस्वेतेषु दैवतेषु समबुद्धयस्स्मार्ता इति च व्यवह्रियन्ते । अतः, अद्वैतबोधकान्येतान्येव षण्मतानि गणकमुद्गलव्यासशङ्कराख्यैर्युगाचार्यैः स्थापितानीति योगसारादिभिर्ग्रन्थैरधिगम्यते । अपि च तेषां गणेशादीनामपि परब्रह्माभिन्नस्वरूपतत्त्वबोधकाः उपनिषत्प्रतिपादिता गणेशैकाक्षरसूर्यैकाक्षरदेव्येकाक्षराशिवपञ्चाक्षरनारायणाष्टाक्षरात्मकाः पञ्च मन्त्रा एवेति उपासनाकल्पसूत्रप्रस्थानत्रयकर्तारो मन्यन्ते । गणेशषडक्षर सूर्याष्टाक्षर देवीपञ्चदशी परमेश्वरद्वादशाक्षरी विष्णुद्वादशाक्षरीमन्त्रा अपि ब्रह्मावबोधका एवेति पाक्षिकः कल्पः । प्रणवमन्त्रस्य तु ब्रह्मावबोधकत्वं उपनिषदुद्घुष्टं सुप्रसिद्धमेव । अथापि केवलप्रणवजपे तुर्याश्रमिणामेवाधिकारदर्शनात्सर्वेऽप्येते मन्त्रास्सप्रणवा एव त्रैवर्णिकानामुपदिश्यन्ते आचार्यैरिति हृदयम् । अतस्सप्रणवा एते पञ्च मन्त्रा वा दश मन्त्रा वा मतमन्त्रा इति व्यवस्थितम् ॥

तथा च ज्ञानसारे—

"मतानामपि पञ्चानां तात्पर्यं निर्गुणं परम् ।
ब्रह्मबुद्ध्यैव पूज्यन्ते ह्युपास्यन्ते च पञ्च ते ॥

मन्त्राणां जपहोमाद्यैः स्तूयमाना हि देवता ।
प्रसन्ना निखिलान्भोगान् पुरुषार्थांश्च यच्छति ॥" इति ॥

योगसारे यथा —

" एवं वै गणनाथश्च पुरुषश्च परश्शिवः ।
शक्तिर्नारायणश्चैव ज्योतीरूपसमन्विताः ॥

ब्रह्मत्वेनैव प्रोच्यन्ते वेदादिष्वपि षट्सु च ।
पञ्चभ्यश्चैव प्रोच्यन्ते सृष्टिस्तु कालभेदतः ॥

एकमेव परं ब्रह्म पञ्चधा परिकीर्तितम् ॥ " इति ॥

श्रीमदप्पय्यदीक्षितेन्द्रैरपि शैवाद्वैतबोधकश्रीकण्ठभाष्यव्याख्याने अयमेव भाव आविष्कृतः ॥ यथा —

" यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानाञ्च निष्ठा
साकं सर्वैः पुराणश्रुतिनिकरमहाभारतादिप्रबन्धैः ।
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भान्ति विश्रान्तिमन्ति
प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्कराद्यैस्तदेव ॥

तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥

अनुग्रहश्च देवस्य देव्या चिद्रूपया सह ।
यथावत्तं परिज्ञाय ध्यायद्भिस्समवाप्यते ॥ " इति ॥

अत्र दीक्षितेन्द्रैः ब्रह्मज्ञानावाप्त्यै न केवलं परमेश्वरानुग्रहमात्रं विवक्षितम्, अपि तु पराशक्त्यनुग्रहोऽपि विवक्षित एव ॥

"ईश्वरप्रणिधानाद्वा" इति पातञ्जलयोगसूत्रव्याख्याने श्रीसदाशिवेन्द्रसरस्वतीपादैरपि अयमेव भावो दृढीकृतः । यथा —

"ईश्वरो हि समाराधनादिना साधनेन आराधितः इदमस्येष्टमस्तु इति संसाराङ्गारे तप्यमानं पुरुषमनुगृह्णातीति भावः ॥" इति ॥

तथा च श्रुतिः—

"मुमुक्षुर्वै शरणमहं प्रपद्ये"

"तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्"

इति ॥

अत्र विष्णोः परब्रह्मत्वावबोधकानि त्रिपाद्विभूतिनारायणोपनिषद्वाक्यानि निदर्शनार्थमुदाह्रियन्ते ॥

यथा—

"कारणात्मकं सर्वं कार्यात्मकं सकलं नारायणः । तदुभयविलक्षणो नारायणः । परञ्ज्योतिः स्वप्रकाशमयो ब्रह्मानन्दमयो नित्यो निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । न स समानाधिक इत्यसंशयं परमार्थतो य एवं वेद । सकलबन्धान् छित्त्वा मृत्युं तीर्त्वा स मुक्तो भवति स मुक्तो भवति ।" इति ॥

एवं गणेशादीनामपि परब्रह्मत्वावबोधिका बह्व्य उपनिषदो विद्यन्त एवेति ज्ञायते ॥

तथा हि योगसारे—

“अद्वैतस्योपनिषदि गाणेशाद्वैतमीरितम् ।
ब्रह्मसन्ध्योपनिषदि सौराद्वैतं प्रकीर्तितम् ॥

भुवनेश्या उपनिषदि शाक्ताद्वैतं समीरितम् ।
नीलकण्ठोपनिषदि शाम्भवाद्वैतमीरितम् ॥

पार्थसारथ्युपनिषदि वैष्णवाद्वैतमीरितम् ॥” इति ॥

प्रायश एतासामुपनिषदामलाभान्नात्र उदाहृता इत्यवधेयम् ॥

अतो गणेशादीनां पञ्चानामपि देवतानां परब्रह्माभिन्नत्वं गणेशादि-मन्त्राणां परब्रह्मस्वरूपतत्त्वबोधकत्वं च सिद्धम् ॥

अथैतासां पञ्चानां देवतानां पूर्णावतारमूर्तयो वल्लभेशसूर्य-नारायणान्नपूर्णानीलकण्ठवासुदेवाद्याः कार्यब्रह्मात्मिका इति तत्स्वरूप-तत्त्वबोधका मन्त्रा आत्मदेवतामन्त्रा इति च व्यपदिश्यन्ते । कार्यकारणयोरभेदान्वयस्य सुगमत्वमिव ब्रह्मात्मनोरभेदान्वयस्य सुगमत्वं बोधयितुं एता देवता आत्मदेवता इति अभिधीयन्ते ॥

स्वाभीप्सितैहिकामुष्मिकसकलेष्टलाभसिद्ध्यर्थं उपास्यमाना देवता इष्टदेवता इति तत्प्रतिपादका मन्त्रा इष्टदेवतामन्त्रा इति च प्रपञ्चितम् । प्रायेणैता देवता मताधिदेवतानामवतारदेवतासु आवरणदेवतासु वा अन्तर्गताः गुरुरक्षाकरार्थसाधकभेदात् त्रिविधाः, उक्तकार्यत्रयसाधिका वा भवन्तीति ॥

तथाच योगसारे —

"इष्टदेवास्त्रिधा प्रोक्ताः गुरुरक्षार्थसाधकाः ।
परलोकज्ञानदाता गुरुदेव इति श्रुतः ॥

सर्वदा स्वात्मरक्षां च विपद्भ्यश्च करोति यः ।
रक्षादेव इति ख्यातः पाण्डवानां यथा हरिः ॥

अर्थदाता शत्रुशिक्षाकरश्चार्थप्रदायकः ॥" इति ॥

उपासनेन परितुष्टा एता देवताः स्वोपासकस्य संभाव्यमानान् सर्वान् क्लेशान् व्यपोह्य स्वयमेव गुरवो भूत्वा तत्त्वावबोधनेनैनं मुक्तिपथं प्रापयन्तीति आचार्या मन्यन्ते ॥

स्वकुलसंभाव्यमानसकलानिष्टनिवृत्त्यर्थं योगक्षेमादिनिखिलश्रेयोभिवृद्ध्यर्थं च स्वकुलवृद्धैः परंपराक्रमेणाराध्यमाना देवताः कुलदेवता इति सर्वजनविदितोऽयं विषयः । तेषां प्रसादजनका मन्त्राः कुलदेवतामन्त्राः । एतासां कुलदेवतानां अनुग्रहेणापि केचिदध्यात्मतत्त्वज्ञा अभूवन्निति विज्ञायते ॥

सकलदुरितनिवृत्त्यर्थं सर्वमङ्गळावाप्त्यर्थं च गृहेष्ववश्यपूजनीयत्वेनाभिहिता बृन्दाद्या देवताः गृहदेवतास्तासां मन्त्रा गृहदेवतामन्त्राः ॥

ग्रामसंभाव्यमानमारीचोराग्निदाहादिबाधाभ्यः ग्रामीणजनद्विपाच्चतुष्पाद्राक्षिकाः हरिहरपुत्रचण्डीकाळीदुर्गाद्या देवता ग्रामदेवताः । तासां मन्त्रा ग्रामदेवतामन्त्राः ।

ब्रह्मा प्रजापतयः इन्द्रादयो लोकपालाः तदधिनाथा देवयोनि-

विशेषाः नवग्रहाः वसवो रुद्रा आदित्या अश्विनाविति त्रयस्त्रिंश-देवतास्तदाधिनाथा देवयोनिविशेषा मरुतः आजानजाः कर्मदेवाः देवर्षयो ब्रह्मर्षयः स्वतपोबलान्महर्षित्वमधिगताश्च लोकदेवताः तेषां मन्त्रा लोकदेवतामन्त्रा इति वैश्वदेवमेव लोकदेवताराधनमिति च बोध्यते ॥

तदेवं सप्तधा विभज्याभिहितानां सर्वासामपि देवतानां उपासन-माराधनं च यथोचितं यथाशक्ति यथामति च अवश्यमनुष्ठेयमिति श्रुतिस्मृतीतिहासपुराणादिभ्योऽवगम्यते ॥

अथैतेषां मन्त्राणामुपासनामार्गभेदाश्च निरूप्यन्ते । उपासनामार्ग-स्संक्षेपाद्द्विविधः— वैदिकस्तान्त्रिकश्चेति । वैदिकोऽपि द्विविधः— कर्म-ज्ञानोभयात्मकः कर्मात्मकश्चेति । तान्त्रिकस्तु त्रिविधः—तान्त्रिकः, वामः, पाषण्डश्चेति । अतः वेदोदितमार्गावलंबिनो वैदिकाः, तन्त्रग्रन्थोक्तमार्गाव-लंबिनस्तान्त्रिका इति व्यवस्थितमेतत् ॥

श्रुत्यादिविहितकर्मानुष्ठानपूर्वकं श्रीमच्छंकरभगवत्पादाद्यैः प्रति-ष्ठापितेषु षट्सु मतेष्वन्यतमं स्वाभीप्सितं मतं मुख्यमवलम्ब्य तत्तद्देवतो-पासनाकल्पसूत्रकारैर्महर्षिभिर्नियुक्तेन मार्गेण सद्गुरोरनुग्रहोपलब्धैः मत-देवतात्मदेवतेष्टदेवतादिमन्त्रैः जपहोमपूजनाद्यैः कर्मभिः तास्ता देवताः प्रत्यहं तर्पयन्तः श्रुतिस्मृतीतिहासपुराणागमाद्यैर्देवतास्वरूपतत्त्व-विचारपराः परब्रह्मावबोधकप्रस्थानत्रयोपनिषदर्थविचारपराः परं ब्रह्म स्वाभिन्नं ध्यायन्तः मनननिदिध्यासनादिपराश्च वैदिकोपासका इति व्यवह्रियन्ते । अतः कर्मज्ञानात्मकद्विविधोपासनपरमा एते वैदिकोपासकाः स्वसत्कर्मनिर्धूतनिखिलकिल्बिषाः स्वोपास्यदेवतानुग्रहविशेषासादिततत्त्वाव-बोधाः योगलभ्यनिखिलसमाधिसिद्धिमन्तः ब्रह्मविदो ब्रह्मनिष्ठाः

प्रारब्धकर्मक्षये ब्रह्मीभूता भवन्तीति श्रुत्यादिभिरुपदिश्यते। अतः अद्वैत-भावापादकं ज्ञानावलम्बनमन्तरङ्गोपासनमद्वैतमिति, मन्त्रजपपूजनादि-बाह्यकरणव्यापारात्मककर्मावलम्बनं बाह्योपासनं मतमिति च श्रीम-च्छंकरभगवत्पादाद्यैः प्राचार्यैर्बहुधा प्रपञ्चितम् ॥

न हि निराकारं निर्गुणं निरवयवं किञ्चिदुपासनाविषयं भवितु-मर्हति। उपासनायां हि उपास्योपासकोपासनाख्यं त्रिपुटीभानमपेक्षितं भवति। अतो मुमुक्षोरादितस्साकारं सगुणं सावयवं गणेशादिरूपं ब्रह्मैव उपासनाविषयं भवितुमर्हति। ततोऽनवरतध्यानाद्यभ्यासवशात् बाह्य-व्यापारवृत्तिमात्रशून्ये चित्ते तादात्म्यभावनाविशेषात् सगुणब्रह्म-साक्षात्कारस्सिध्यति। ततोऽपि निरन्तराभ्यासविशेषात् बाह्याभ्यन्तरवृत्ति-शून्यं चित्तं नश्यति। तदा निर्विकल्पं निराकारं निर्गुणं निरवयवं नित्य-ज्ञानानन्दात्मकमात्मानं जानाति। तदिदं नित्यज्ञानानन्दात्मक-मात्मज्ञानमेव अद्वैतं कैवल्यं ब्रह्मभूयसिद्धिर्मुक्तिरिति च श्रुत्यादि-निखिलवेदान्तशास्त्रैरुपदिश्यते ॥

श्रुत्यादिविहितकर्मानुष्ठानपरा गणेशादिमन्त्रजपपूजादिबाह्यकर्मा-वलंबनमात्रपरा अपि वैदिकोपासका एव। एतेष्वपि केषांचित् देवतानुग्रह-विशेषात् ब्रह्मज्ञानसिद्धिरपि भवत्येवेति महान्तो मन्यन्ते। प्रमाणानि चात्रोपलभ्यन्त एव। कार्यब्रह्मोपासकानामेतेषां कार्यब्रह्मलोकावासिरेव फलं प्रतिपाद्यते ॥

अतो वैदिकोपासनामार्ग एव निश्श्रेयससाधनमिति पर्यवसन्नोऽर्थः ॥

तान्त्रिकोपासनामार्गभेदास्त्रयः— तान्त्रिको वामः पाषण्डश्चेति।

अतस्तच्छीलास्तान्त्रिका वामाः पाषण्डाश्चेत्यभिधीयन्ते । श्रुत्यादिविहित-कर्मानुष्ठानसदाचारविहीनाः देवतास्वरूपतत्त्वज्ञानविहीनाः अतिनश्वर-फलमात्रकामनया मन्त्रजपादिक्रियामात्रपराः तान्त्रिकाः, श्रुत्यादिनिषिद्धै-र्दोषापादकैर्मधुमांसादिभिः देवतातोषणपरा वामाः, स्वशरीरोत्कर्तनाद्यै-रुपलब्धरक्तमांसादिभिः हिंसात्मकातिनिन्दितजीवबलिदानादिभिश्च देवता-तर्पणशीलाः पाषण्डा इत्युच्यन्ते । एतानवैदिकान् नियमयितुमेव तन्त्रशास्त्रं प्रवर्तितमिति महद्भिर्बहुधा समुपन्यस्तम् । अथापि केवलतान्त्रिको मार्गः अवैदिकोऽपि निःश्रेयससाधनतयाऽनङ्गीकृतोऽपि देवताप्रसादजनकत्वात् नातितरां निन्द्यः । अपरौ वामपाषण्डौ तु निन्द्यौ निरयदौ चेति निषिद्धौ ॥

अतो वैदिकमार्गोपासनासाधनीभूतास्सर्वेऽपि मन्त्रा आत्मज्ञान-साधनीभूता एवेति अनवद्योऽयमाशयो बहूनां महतां मान्यानामाचार्याणा-मिति शिवम् ॥ इत्थं

क्षे. शं. सुब्रह्मण्यशास्त्री,

गाणेशाद्वैती ।




॥ मन्त्रशास्त्रमातृकाकुञ्चिका ॥

Bundle No.	Supplemental No.	Burnell's No. of Mss.	O. S. R. No. of Mss.	No. less Mss.	No. Nil. Mss.	No. of missing Mss.
1	1	6682				
2	2—10	6683 - 6691				6692
3	11—14	6693—6696				
4	15—18	6697—6700				
5	19—21	6701—6703				
6	22	6704				
7	23 & 24	6705 & 6706				
8	25—28	6707—6710				
9	29 & 30	6711 & 6712				
10	31—37	6713—6722				6715, 6718 & 6720
11	38-162	6723—6819	14840—14872		1	14841—14845
12	163-253	6820—6902	14873—14876	1—4	2	6864 & 6871

॥ श्रीगणेशाय नमः ॥

॥ मन्त्रशास्त्रग्रन्थसूचिकायाः शुद्धाशुद्धपाठः ॥

Page No.	शुद्धपाठः	अशुद्धपाठः
191	No. less. 1	Burnell's No No less. 1
192	No. less. 2	,, ,, ,, 2
,,	No. less. 3	,, ,, ,, 3
376	Burnell's No. 7213	Burnell's No. 7231
381	Sup No. 765	Sup No. 768
383	No. Nil	No.
,,	Bundle No. 21 No less 1	Bundle No. 21
,,	Bundle No. 21 No. less. 2	,,
459	19 मूलिकाविधिः	10 मूलिकाविधिः
496	No. 12123	No. 12122
,,	No. 12124	No. 12123



॥ श्रीगणेशाय नमः ॥

A

DESCRIPTIVE CATALOGUE

OF THE

MANTRA ŚĀSTRA MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFŌJI'S

SARASVATĪ MAHĀL LIBRARY.

श्रीमन्मन्त्रशास्त्रग्रन्थानां सूचीपत्रम् ॥

॥ प्रपञ्चसारसारसङ्ग्रहः ॥

PRAPAÑCASĀRASĀRASAṄGRAHA

ப்ரபஞ்சஸாரஸாரஸங்கிரஹம்

Supplemental No. 1. Bundle No. 1. Burnell's No. 6682
Substance—Paper. Sheets—1—585 + Index 6 = 592. Script—Devanāgarī. No. of Granthas—16000. Complete (1-32 Paṭalas). Author—Gīrvāṇendrasaraswati.

Beginning ;

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

नत्वा श्रीशङ्कराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसङ्ग्रहमुत्तमम् ॥

End :

शङ्करश्चामरेन्द्रश्च विश्वेश्वर इति त्रयः ।
पुनन्तु मामकीं बुद्धिमाचार्याः कृपया मुदा ॥

अमरेन्द्र इति (यतिः) शिष्यो गीर्वाणेन्द्रस्य योगिनः ।
तस्य विश्वेश्वरश्शिष्यो गीर्वाणेन्द्रोऽहमस्य तु ॥

शिष्यः प्रपञ्चसारस्य व्यदधां सारसङ्ग्रहम् ।
येनं (एनं) दृष्ट्वाऽखिलास्सन्तस्सन्तुष्टास्सन्तु सन्ततम् ॥

साध्वसाधुविवेकेन लिखितं वापि यन्मया ।
तदपि प्रियशिष्यत्वात्स्वामी वीक्ष्याभिनन्दतु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

हरिः ॐ ॥ शुभमस्तु ॥ श्रीसाम्बसदाशिवो रक्षतु ॥
श्रीगुरुभ्यो नमः ॥ श्रीशुभमस्तु ॥

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गळा ।
तयोस्संस्मरणात्पुंसां सर्वतो जयमङ्गळम् ॥

Colophon :

इति गीर्वा[illegible] विरचिते प्रपञ्चसारसारसंग्रहे द्वात्रिंशः पटलः ॥

Subject :

१. एकाक्षरादिपञ्चदशगणेशमन्त्राः, तेषां यन्त्राणि प्रयोगाश्च ।

२. सूर्याष्टाक्षरमन्त्रः, प्रयोजनतिलकाख्योऽन्यो मन्त्रः, तयोर्यन्त्रे प्रयोगाश्च ॥

३. एकाक्षरदेवीमन्त्रः, श्रीविद्यापञ्चदशीमन्त्रभेदाः, अन्नपूर्णाबालालक्ष्मीसरस्वत्यादिस्त्रीदेवतामन्त्राः पञ्चाशतोऽधिकाः, तेषां न्यासाः यन्त्राणि प्रयोगाश्च ॥

४. शिवपञ्चाक्षरमन्त्रः, नीलकण्ठदक्षिणामूर्त्यादिशैवमन्त्राः, द्वात्रिंशतोऽधिकाः, तेषां यन्त्राणि प्रयोगाश्च ॥

५. नारायणाष्टाक्षरमन्त्रः, रामकृष्णादिविष्णुदेवतादेवतामन्त्राः, गरुडहनुमदादिमन्त्राश्च त्रिंशदधिकाः, तेषां यन्त्राणि प्रयोगाश्च ॥

६. इन्द्रादिलोकदेवतामन्त्राः, नवग्रहमन्त्राः, नानाफलदा ऋङ्मन्त्राश्च पञ्चविंशत्युत्तरशताधिकाः, तेषां प्रयोगादयश्च ॥

७. सिद्धारिऋणधनशोधनमन्त्रदोषतन्निवर्तकोपायादयः, तान्त्रिकसंज्ञापरिभाषादयश्च सम्यक् प्रतिपादिताः ॥

Remarks—The Ms. is in good condition. This is not printed.

இந்த நூல், ஸ்ரீவாணேசந்திரஸரஸ்வதியவர்களால் செய்யப்பட்டது. இது ஸ்ரீமதாசிசங்கரபகவத்பாதாளால் செய்யப்பட்ட பிரபஞ்சஸாரத்தைத் தழுவி, கிரமதீபிகை, மந்திரதேவதா பிரகாசிகை, சாரதாதிலகம், முதலிய பல நூல்களை அனுஸரித்து எழுதப்பட்டது.

இதில் ஏகாக்ஷரம் முதலிய கணபதி மந்திரங்களும், சிவபஞ்சாக்ஷர மந்திரங்களும், நீலகண்ட தக்ஷிணாமூர்த்தி அகோர வீரபத்ராதி சைவமந்திரங்களும், ஸூர்ய மந்திரங்களும், தேவீ பஞ்சதசீ, பாலா அன்னபூர்ணா முதலிய பல தேவீ மந்திரங்களும், அஷ்டாக்ஷர மந்திரமும் ராமகிருஷ்ணாதி வைஷ்ணவ மந்திரங்களும், இந்திராதி லோகதேவதாமந்திரங்களும், நவக்ரஹ மந்திரங்களும், பல வேத மந்திரங்களும், மந்திர சாஸ்திர ஸம்பந்தமான ஸகல ஸம்ஜ்ஞை பரிபாஷைகளும் நன்கு கூறப்பட்டிருக்கின்றன.

॥ सिद्धनागार्जुनतन्त्रम् ॥

SIDDHANĀGĀRJUNATANTRAM

ஸித்தநாகார்ஜுநதந்திரம்

Supplemental No. 2. Bundle No. 2. Burnell's No. 6688. Substance—Paper. Sheets—1-46+Index 3=49. Script—Devanāgarī. No. of Granthas—2000. Complete (1-20 Paṭalas.) Author—Siddhanāgārjuna.

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीरामचन्द्राय नमः ॥

श्रीगुरुभ्यो नमः ॥ अथ सिद्धनागार्जुनो(नीयं) लिख्यते ॥

अन्तरायतिमिरौघशान्तये
शान्तये(पा)वनमाचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरं मुखे
अद्रिजे(जा)विमलतुष्टि(न्दि)लं महः ॥

End :

पूर्वफल्गुननक्षत्रे ग्राह्यं दाडिमबन्धकम् ।
करे बद्धा भवेद्धश्यो यदि राजा पुरन्दरः ॥
श्रीरामाय नमः ॥ सिद्धनागार्जुनं (नीयं) समाप्तम् ॥

श्रीविश्वनाथाय नमः ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥
परियधावि (परिधावि)नामसंवत्सरे माघशुद्धद्वादशीभौमवासरे इदं सिद्धनागार्जुनपुस्तकं लिखितम् ॥

Colophon :

इति सिद्धनागार्जुनविरचिते कक्षपुटे सर्वसङ्ग्रहं(हो) नामे(म) विंशतिपटलः ॥

Subject ;

षट्कर्मप्रयोगार्हा मन्त्राः । तत्तत्कर्मोचिततन्त्राणि । पशुपाक्षिमनुष्य-गातिमास्तितम्भनादिप्रयोगविधयः। अस्त्रशस्त्रस्तम्भनखण्डनादिविधयः। अग्न्यादि-दिव्यस्तम्भनविधयः । विद्युत्स्तम्भनविधिः । नानारोगोत्पादनविधयः । अस्त्रा-स्त्रलाभविधिः । नानाकौतुकदर्शनविधयः । अदृश्यकरणाद्यञ्जनविधयः । पादुकाघुटिकाखेचरादिसिद्धिक्रमाः । म्रियमाणजीवनोत्पादनविधिः । मृतसञ्जी-विनीमन्त्रप्रयोगादयः । वन्दाकप्रयोगाश्च सम्यक् प्रतिपादिताः ॥

Remarks :—The Ms. is in good condition. The Ms. abruptly breaks in the beginning of 21st paṭala.

இந்நூல் ஸித்தநாகார்ஜுனனால் எழுதப்பட்டது. இதில், ராஜா, மந்திரி, ஸ்திரீ புருஷர் முதலியவர்களின் வசியம், முதலிய ஆறுவித பிரயோகங்களும், பசு பக்ஷி மிருகங்கள், மனிதர்கள், அக்னி வாயு ஜலம், முதலியவற்றின் கதிமதி ஸ்தம்பனங்களும், இடி மின்னல் முதலியவைகளை ஸ்தம்பனம் செய்யும் முறைகளும், பலவித ஜாலவித்தைகள் காட்டும் முறைகளும், பாதுகாஸித்தி, குடிகாஸித்தி, ஆகாசகமனஸித்தி, மறைவு, முதலியவைகளும், இறந்தவனை பிழைக்கவைக்கத் தக்க முறைகளும், பில்லுருவி பிரயோகங்களும் கூறப்பட்டிருக்கின்றன.

॥ सिद्धनागार्जुनीयम् ॥

SIDDHANĀGĀRJUNĪYAM

ஸித்தநாகார்ஜுநீயம்

Supplemental No. 3–8. Bundle No 2. **Burnell's No. 6684–6689** (6 Mss.) Substance—Paper. Sheets—8, **10**, 8, **12**, 8 **& 13.** No. of Granthas-120, 204, 150, 215, **145 & 200.** Portions Complete. Author—Siddhanāgārjuna.

Beginning, End & Colophon: Same as in **Ms. No. 6686.**

Subject:

आसु षण्मातृकासु क्रमेण १, ६, ७, १३, १८, १४. पटलाः सन्ति. [एकैका मातृका एकैकपटलात्मिकेत्यवधेयम्]

Each Ms. contains one Paṭala namely, 1, 6, 7. 13, 18, & 14, respectively.

Remarks—These Mss. are in good condition.

॥ क्रमदीपिका ॥

KRAMADĪPIKĀ

கிரமதீபிகை

Supplemental No. 9 A. Bundle No. 2. Burnell's No. 6690 A

Substance—Paper—Sheets—1—31 (Text—sheets 1-31; commentary—Sheets 31-66) Script—Devanāgarī. No. of Granthas—1100. Complete—(1-8 Paṭalas) Author—Keśava Bhaṭṭa. (?)

Beginning.

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ॥

श्रीकुलस्वामिने नमः ॥

कलात्तमायालवकान्तमूर्तिः कलक्कणद्वेणुनिनादरम्यः ।

श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥

End.

जनमिममनुविद्धो (द्धा)येन यस्मिन्प्रसूते

यदनुततमजस्रं पाति चाधिष्ठिता यम् ।

यदुरुमनुउदर्चिर्यं विधत्ते च गोपी

तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥

Colophon:

इति श्रीक्रमदीपिकायामष्टमः पटलः ॥ क्रमदीपिका समाप्ता ॥

Subject:

गोपालोपासनाकल्पः । न्यासाः मुद्रालक्षणानि । कृष्णस्वरूपवर्णनं । षडक्षराष्टाक्षर - विंशत्यक्षर - द्वाविंशत्यक्षर - त्रिंशदक्षराष्टाचत्वारिंशदक्षरादि-गोपालमन्त्राः, तेषां सिद्धिक्रमः, प्रयोगाः, कृष्णसप्तावरणपूजाविधिः, कृष्णोपासनामहिमा च प्रतिपादिताः ॥

Remarks—The Ms. is in good condition.

॥ भावदीपिका ॥ [क्रमदीपिकाव्याख्या]

BHĀVADĪPIKĀ

பாவதீபிகை (கிரமதீபிகைக்கு உரை)

Supplemental No. 9 B. Bundle No. 2. Burnell's No. 6690 B

Substance—Paper. Sheets—31-66 (Sheets 1-31 Text, 31-

66 commentary.) Script—Devanāgarī. No. of Granthas 1200. Incomplete (1-6½ Paṭalas). Author—Nityaprajña.

Beginning :

आलीढवेणुमरुणाधरपल्लवेन

गोपाङ्गनाप्रणयिनं प्रणिपत्य कृष्णम् ।

सत्संप्रदायसरणीमनुसृत्य कुर्वे

व्याख्यां मुकुन्दयजनक्रमदीपिकायाः ॥

End :

संवित्तिं ब्रह्मज्ञानं । तथेति ङेन्तमित्यर्थः ।

अस्त्यग्निमायाश्रीत्यक्षरं ङेन्तमित्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यप्राज्ञशिष्येण नित्यप्रज्ञेन वनापर-नामधेयेन विरचितायां क्रमदीपिकाभ(भा)वदीपिकायां षष्ठः पटलः ॥

इति भावदीपिकायां षष्ठः पटलः ॥

Subject : क्रमदीपिकाव्याख्या ॥

Remarks—The Ms. is in good condition. The Ms. abruptly breaks in the middle of 7th Paṭala.

இதில் 1–31 பக்கங்கள் கிரமதீபிகை மூலம். 31–66 பக்கங்கள் கிரமதீபிகையின் உரை. கிரமதீபிகை 1–8 படலங்கள். கிரமதீபிகையின் உரையில் 1–6½ படலங்கள்தான் இருக்கின்றன.

கிரமதீபிகையில் ஸ்ரீ கிருஷ்ண மந்திரங்களில் 6, 8, 20, 22, 30, 48, அக்ஷரங்களுள்ள பல மந்திரங்களும், அவைகளுக்கு நியாஸங்களும், ஸித்தி முறைகளும், கிருஷ்ணஸப்தாவரண பூஜாவிதியும், கிருஷ்ணோபாஸனத்தின் பெருமையும், கூறப்பட்டிருக்கின்றன.

॥ श्रीशिवार्चनचन्द्रिका ॥

SRI ŚIVĀRCANACANDRIKĀ

ஸ்ரீ சிவார்ச்சநசந்திரிகை.

Supplemental No. 10. Bundle No. 2. Burnell's No. 6691
Substance—Paper. Sheets—1-172(+Index 3 + 7=182)
Script—Devanāgarī. No. of Granthas—5840. Complete—
(1-16 prakāśas.) Author—Srīnivāsa Bhaṭṭa.

Beginning :

श्रीमहागणपतये नमः ॥ श्रीदक्षिणामूर्तये नमः ॥ श्रीगीर्वाणेन्द्रयोगिने नमः ॥ ॐ ॥

श्रीमन्तं सिन्दुरास्यं शशिशकलधरं बन्धुजीवाभिरामं
दानाम्भस्सिक्तगण्डस्खलदलिकलभाँह्लीलया खेलयन्तम् ।
प्रत्यूहध्वान्तभानुं पृथुतरजठरं ब्रह्मविष्णवीशवन्द्यं
वन्दे सिन्दूरपूरैर्गिरिवरसुतया चर्चितोत्तुङ्गकुम्भम् ॥

End :

सुन्दराचार्यशिष्येण श्रीनिवासेन धीमता ।
चन्द्रिकायां प्रणीतायां प्रकाशष्षोडशोऽगमत् ॥

Colophon :

इति श्रीसुन्दराचार्यचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचन्द्रिकायां षोडशः प्रकाशः ॥

Subject :

शैव शाक्त सौर गाणेश वैष्णव मन्त्राः । नित्यनैमित्तिककाम्यपूजाविधिः । पञ्चानां देवतानां पीठपूजा । आवरणपूजा । उत्थानादिशयनान्तं इतिकर्तव्यताविधिः । मुद्रालक्षणानि । यन्त्राणि काम्यप्रयोगाः । सिद्धिक्रमः । दीक्षाविधिः । तान्त्रिकग्रन्थसामान्यभूताः सर्वे च विषयाः सम्यक् निरूपिताः ॥ विस्तृता विषयसूचिकापि वर्तते ॥

Remarks—The Ms. is in good condition.

ஸ்ரீ சிவார்ச்சனசந்திரிகை என்பது ஓர் சிறந்த நூல். இதில் பஞ்சாக்ஷரம் முதலிய சைவமந்திரங்களும், ஸ்ரீவித்யை முதலிய சாக்தமந்திரங்களும், அஷ்டாக்ஷரம் முதலிய ஸௌர வைஷ்ணவ மந்திரங்களும், பல கணபதி மந்திரங்களும், அவைகளின் ஸித்திக்கிரமங்களும், நித்யநைமித்திக காம்ய பூஜைகளும், ஆவரணபூஜைகளும், பல காம்யபிரயோகங்களும், அவைகளுக்கான யந்திரங்களும், ஸித்தாரிசோதநம் முதலியவைகளும் மந்த்ரதோஷங்கள், அவைகளுக்கு பரிஹாரங்கள், முதலிய பல விஷயங்களும் கூறப்பட்டிருக்கின்றன. இதற்கு விவரமான விஷய அட்டவணையும் இருக்கிறது.

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 11. Bundle No. 3. Burnell's No. 6698
Substance—Paper. Sheets—1-117 (+Index10=127.)
Script—Devanāgarī. No. of Granthas—3400. Complete—(1-25 Paṭalas.) Author—Sri Lakṣmaṇa Deśikendra.

Beginning :

श्रीगणेशाय नमः ॥

नित्यानन्दवपुर्निरस्खल(न्तर)ग[ल]त्पश्चा(श्वा)शदस्यैः(र्णैः) क्रमा-
द्व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्(ङ्क)सदनं वाचामधीशं महः ॥

End ;

अनाद्यन्ता शंभोर्वपुषि कलितार्ऽर्धेन वपुषा
जगद्रूपं पश्यं(न्नश्य)त्सृजति महती(नी)यामपि गिरम् ।
सदर्था शब्दार्थस्तनभरनता शंकरवधू-
र्भवद्भूत्यै भूयाद्भवजनितदुःखौघशमनी ॥

Colophon :

इति श्रीशारदातिलके पञ्चविंशः पटलः ॥ श्रीशिव ॥ श्रीशिव ॥ श्रीशिव ॥ श्रीशिव ॥

Subject :

पञ्चदेवतामुख्यमन्त्राः । तेषां अवतारमूर्तिमन्त्राः । यन्त्राणि। तेषां पीठपूजा । आवरणपूजा । न्यासः । शैववैष्णवशाक्ताष्टगन्धद्रव्याणि । पुरश्चर्याविधिः । दीक्षाकालादितान्त्रिकसामान्यविषयाश्च प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in good condition. The sheets of Index are smaller than the sheets of Text.

இது ஒரு சிறந்த நூல். இதில் சைவ, சாக்த, வைஷ்ணவ ஸௌர, காணேச மந்திரங்கள், அவைகளின் ஸித்திக்கிரமங்கள், யந்திரங்கள், பீடபூஜைகள், ஆவரண பூஜைகள், ந்யாஸங்கள், சைவ வைஷ்ணவ சாக்த அஷ்டகந்தங்கள், தீக்ஷாகாலங்கள், முதலிய ஸகல விஷயங்களும் கூறப்பட்டிருக்கின்றன.

இத்துடன் விவரமான விஷய அட்டவணையும் இருக்கிறது.

॥ हर्षकौमुदी [शारदातिलकव्याख्या] ॥

HARṢAKAUMUDĪ

ஹர்ஷகௌமுதீ

Supplemental No. 12. Bundle No. 3. Burnell's No. 6694
Substance—Paper. Sheets—1-281. Script—Devanāgari. No. of Granthas—6500. Incomplete (1-19 Paṭalas Complete). Author—Vātsya Śri Harṣa.

Beginning :

श्रीगुरुभ्यो नमः ॥

श्रीरामनारायणविष्णुकृष्णब्रह्माम्बिकाशंकरवासुदेवाः ।
यस्य स्वरूपं जगतोंबरस्य नीरस्वरूपं पुरुषं भजामः ॥

End :

क्षेत्रपालमन्त्रमाह— वर्णान्त्यमिति । वर्णात्पक्षः (वर्णान्त्यः क्षः) । हृत् नमः । प्रणवः । ततः ॐ क्षौं क्षेत्रपालाय नमः ॥

Colophon :

इति शारदातिलकटीकायां हर्षकौमुद्यां एकोनविंशतिमं पटलं संपूर्णम् ॥

Subject :

शारदातिलकस्य व्याख्या ॥

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks in the middle of 20th Paṭala.

இது 'சாரதா திலகம்' என்ற பிரஸித்தமான மந்த்ர சாஸ்திரத்தின் விரிவுரை.

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 18. Bundle No. 3. Burnell's No. 6695 Substance—Paper. Sheets—1-14+1=15. Script—Devanāgari. No. of Granthas—150. Incomplete. Author—Lakṣmaṇa Deśikendra.

Beginning :

श्रीगणेशाय नमः ॥

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमात्

व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।

शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं

तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः ॥

End :

कुण्डोदर्यूर्ध्वकेशी च तथा विकृतमुख्यपि ।

ज्वालामुखी तथा ज्ञेया पश्चादुल्कामुखी ततः ॥

सुश्रीमुखी च विद्यामुखे ++ ॥

Colophon :

इति शारदातिलके प्रथमः पटलः ॥

Subject:

शारदातिलके प्रथमपटलमात्रम् ॥

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks in the middle of 2nd paṭala.

The 15th sheet is a fragment from a work in Āyurveda & treats of Śvayathu (swelling).

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 14. Bundle No. 3 Burnell's No. 6696
Same as in Ms. No. 6693.

Remarks:—The Ms. is in good condition. There are 16 verses of Nāḍī Nirṇayam on the title page. The year Samvat 1845 is given at the end of the Ms. At the end of the Ms. is written in Marāthi language as follows:—

"The Ms. was purchased and brought by Śri Serfoji Mahārāja from Benares."

॥ मन्त्रशास्त्रसङ्ग्रहः ॥

MANTRA ŚĀSTRA SAṄGRAHAH

மந்திரசாஸ்திரஸங்கிரஹம்

Supplemental No. 15. Bundle No. 4. Burnell's No. 6697 A, B, C, & D. Substance—Paper. Sheets—1-83+1-41+1-13+1+70=207. Script—Devanāgarī. No. of Granthas—906+445+124+771=2246. Incomplete—(1—4 Adhyāyās). Author—Sri Tulajā Mahārāja.

Beginning:

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः । श्रीकृष्णस्वामिने नमः ।

नत्वा श्रीशङ्कराचार्यं दीपाम्बामेकभूपतिम् ।

क्रियते तुळजेन्द्रेण मन्त्रशास्त्रस्य सङ्ग्रहः ॥

End :

देवीमाहात्म्यस्य प्रतिश्लोकं पायसैस्तिलैस्सर्पिषा पञ्चामृतैश्च जुहुयात् ॥

Colophon :

इति श्रीमहाराजतुळजेन्द्रविरचिते मन्त्रशास्त्रसङ्ग्रहे देवीविषयो नाम चतुर्थोऽध्यायः ॥

Subject :

१. दीक्षाकालमन्त्रदोषवर्णौषध्यासनफलादयः । पुष्पदन्त, नन्दिकेश्वर, मार्कण्डेय, भगवत्पादशिवमहिम्नस्तोत्राणि च प्रथमाध्याये ॥

२. वल्लभगणपतिमन्त्रः, शिवपञ्चाक्षरनीलकण्ठादिशैवमूर्तिमन्त्राः, अजपा चेति पञ्चदशमन्त्राः । तेषां सिद्धिक्रमः । यन्त्राणि । प्रयोगाश्च द्वितीयाध्याये ॥

३. सूर्यार्घ्यविधिः । चन्द्राग्निमन्मथसुदर्शनहयग्रीवसन्तानगोपालमन्त्राः । तेषां प्रयोगाश्च तृतीयाध्याये ॥

४. भुवनेशीललितादिदेवतामन्त्राः सप्तदश । तेषां सिद्धिक्रमः । यन्त्राणि । प्रयोगाश्च चतुर्थाध्याये ॥

Remarks:—The Ms. is in good condition.

இந்நூலில் அடங்கியுள்ள விஷயங்களை அடுத்த கம்பரில் பார்க்கவும்.

॥ मन्त्रशास्त्रसङ्ग्रहः ॥

MANTRA ŚĀSTRA SANGRAHAH

மந்திரசாஸ்திரஸங்கிரஹம்

Supplemental No. 16. Bundle No 4. Burnell's No. 6693.

Substance—Paper. Sheets—1—227. Script—Devanāgarī. No. of Granthas—2544 Complete—(1—5 Adhyāyas). Author-Sri Tulajā Mahārāja.

Beginning ;

नत्वा श्रीशङ्कराचार्यं दीपाम्बामेकभूपतिम् ।
क्रियते तुळजेन्द्रेण मन्त्रशास्त्रस्य सङ्ग्रहः ॥

End :

दशांशं योनिकुण्डे तु हुत्वा देवी प्रसीदति ।
विचित्रा साधकस्यैव प्रयच्छेदीप्सितं फलम् ॥
झ्रं जुं सः पुष्कलावर्तकाभ्यां नमः मेघवृष्टिं कुरु कुरु ॥

Colophon :

इति श्रीमहाराजतुळजेन्द्रविरचिते मन्त्रशास्त्रसङ्ग्रहे पञ्चमोऽध्यायः ॥

Subject :

१—४ अध्यायेषु No. 6697 मातृकागता विषया एव । पञ्चमाध्याये तु ज्वरधन्वन्तरिघण्टाकर्णवैश्रवणाचित्रसेननवग्रहव्यासशंकरनारायणार्धनारीश्वरचिन्तामणियक्षिणीपुष्कलावर्तकमन्त्राः । प्रायेणैतेषां प्रयोगाश्च सन्ति ॥

Remarks:—The Ms. is in good condition. The Mahimnastava is after the 1st Adhyāya in Ms. No 6697. The same is found after the 5th Adhyāya in this Ms.

இந்த நூல் ஸ்ரீ துளஜா மஹாராஜாவினால் இயற்றப்பட்டது. இதில் தீக்ஷாகாலம் முதலிய பொதுவான விஷயங்களும், வல்லபகணபதிமந்திரமும், பஞ்சாக்ஷரம், நீலகண்டம், முதலிய 15 சைவ மந்திரங்களும், புவனேச்வரி, லளிதை, முதலிய ஸ்திரீ தேவதா மந்திரங்கள் 17ம், ஸூரியன், சந்திரன், அக்னி, மன்மதன், ஸுதர்சனம், ஹயக்ரீவர், ஸந்தானகோபாலன் ஆகிய தேவதாமந்திரங்களும், அவைகளின் ஸித்திமுறைகள் பிரயோகங்களும் கூறப்பட்டிருக்கின்றன.

॥ मन्त्रशास्त्रसङ्ग्रहः ॥

MANTRA ŚĀSTRA SANGRAHAḤ

மந்திரசாஸ்திரஸங்கிரஹம்

Supplemental No. 17. Burnell's—6699 Sheets—168 (58-61 missing). Same as in Ms. No. 6698

Remarks :

स्थितिस्समीचीना ॥ वर्णौषधिविध्यात्मकं 58—61 पत्रचतुष्टयं नष्टम् । Ms. No 6698 मातृकायां विद्यमानानि स्तोत्राणि न विद्यन्त इति विशेषः ॥

॥ स्वयंवरामन्त्रविधानम् ॥

SWAYAMVARĀMANTRA VIDHĀNAM

ஸ்வயம்வராமந்திரவிதானம்

Supplemental No. 18. Bundle No. 4. Burnell's No. 6700 Substance—Paper. Sheets—1—20+1=21. Script—Devanāgarī. No. of Granthas—225. Complete.

Beginning :

श्रीगणेशाय नमः ॥ अथ मातङ्गेश्वरीमन्त्रप्रसङ्गात् शाक्तेयत्वसामान्येन स्वयंवरामन्त्रविधानं मन्त्रसारोक्तमपि योग्यतावशाल्लिख्यते ॥

End :

एषु स्थानेषु पञ्चभिर्बाणमन्त्रैर्दशावृत्त्या न्यसेत् इत्यभिप्रायः । पश्चात्काममन्त्रं जपेच्च ॥

Colophon : Nil.

Subject :

स्वयंवरापार्वतीमन्त्रः । न्यासः । यन्त्रं । पूजा । प्रयोगाः । पञ्चबाणन्यासश्च ॥

Remarks:—The Ms. is in good condition. This is a portion of Prapañcasāra sāra saṅgraha.

இதில் ஸ்வயம்வராபார்வதி மந்திரம், யந்திரம், ப்ரயோகங்களும், பஞ்சபாண வியாஸமும் இருக்கின்றன.

॥ मन्त्रदेवताप्रकाशिका ॥

MANTRADEVATĀPRAKĀŚIKĀ

மந்திரதேவதா பிரகாசிகை

Supplemental No. 19. Bundle No. 5. Burnell's No. 6701. Substance—Paper. Sheets—1—179 + 1=180 + Index I—14=194. Script—Devanāgarī. No. of Granthas—3540 + Index 200=3740. Complete—(1—22 paṭalas) Author—Viṣṇu Deva.

Beginning :

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ॥

ॐकारात्माक्षराधीभुवनपशिवविद्दक्षिणामूर्तियी(गी)ता-

रत्नत्र्यम्बकोद्यन्मृतिहरणमहागाणपत्यादिरूपिन् ।

अष्टार्णद्वादशार्णा(र्ण)प्रियनृहरितनो श्रीवराहश्च चक्रि-

कृष्णात्मन् राम विष्णो विविधगुणमहाशक्तिभास्वन्नमस्ते ॥

End :

श्रीमत्प्रपञ्चसारादि......(मन्त्र)शास्त्र...(स्य)सङ्ग्रहः ।

कृतिर्विजयते सैषा मन्त्रदैवप्रकाशिका ॥

परमारा...लक्ष्मीशः... ... ... ।

कृतिः श्रीविष्णुदेवस्य श्री... ...(मत्) कोटीश्वरेऽर्पिता ॥

Colophon :

इति मन्त्रदेवताप्रकाशिकायां ... ...

द्वाविंशः पटलः । श्रीपरमेश्वरार्पणमस्तु । शुभमस्तु ॥

Subject :

पञ्चदेवतामन्त्राः । तदंशावतारदेवतामन्त्राः । लोकदेवतामन्त्राः । काम्यैकफलदा मन्त्राः । तत्तद्देवतापीठपूजा । न्यासाः । आवरणपूजा । यन्त्राणि । प्रयोगविधयः । गुरुशिष्याग्निकुण्डमालालक्षणानि । आसनफलम् । मन्त्रदोषतत्परिहारोपायादयश्च सम्यक् प्रतिपाद्यन्ते ॥

Remarks—The Ms. is in good condition.

இந்நூலியற்றியவர் விஷ்ணுதேவர். இதில் கணபதி, ஸூரியன், சக்தி, சிவன், விஷ்ணு, இவர்களின் முக்கிய மந்திரங்களும், அவர்களின் அம்சாவதார தேவதைகளான, நீலகண்டர், பைரவர், ராமன், கிருஷ்ணன் முதலிய மற்ற தேவதைகளின் பல மந்திரங்களும், அவைகளுக்கு ந்யாஸம், யந்திரம், பீடபூஜை ஆவரண பூஜை, பிரயோகங்களும், குரு சிஷ்யாக்னிகுண்டமாலாலக்ஷணம், மந்திரதோஷங்கள், அவைகளுக்கு பரிஹார முறைகளும், மற்றும் பல விஷயங்களும், நன்கு கூறப்பட்டிருக்கின்றன.

॥ मन्त्रदेवताप्रकाशिका ॥

MANTRADEVATĀPRAKĀŚIKĀ

மந்திரதேவதா பிரகாசிகை

Supplemental No. 20. **Burnell's** No. 6702. **Sheets—98.** **Same as in Ms.** No. 6701.

Remarks—The Ms. is very old and good.

॥ महालक्ष्मीरत्नकोशः ॥

MAHĀLAKSMĪRATNAKOŚAH

மஹாலக்ஷ்மீரத்னகோசம்

Supplemental No. 21. **Bundle** No. 5. **Burnell's No. 6703** **Substance—Paper. Sheets—1-186+Index 5=191. Script-**

Devanāgarī.
Complete.

Author : उमामहेश्वरसंवादात्मकः ।

Beginning :

श्रीगुरुभ्यो नमः । श्रीगणेशाय नमः ॥

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
नानापुष्पलताकीर्णे नानासिद्धगणान्विते ॥
मुनिसंघैस्समाकीर्णे योगिवृन्दैर्निषेविते ।
प्रणम्य विधिवद्देवमिदं वचनमब्रवीत् ॥

End :

राजाधिराजपरमेश्वरराजलक्ष्मीं
वर्म(र्मा)प्रकाश्यमिदमीश्वरि वर्मकार्यम् ।
कालेषु यः पठति मन्त्रमिदं वरिष्ठः
सिद्धिं श्रियं च स लभेदिह पूज्यमानः ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पेत्यादि उमामहेश्वरसंवादे शङ्करेण विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशे पञ्चोत्तरशततमोऽध्यायः ॥ श्रीमहालक्ष्मीरत्नकोशपुस्तकं समाप्तम् ॥

Subject :

महालक्ष्मीमन्त्रः । लक्ष्मीषोडशाक्षरीमन्त्रः । महाशान्तिविधिः, तन्निमित्तानि । श्रीसूक्तजपविधिः, अभिषेकविधिश्च । वाग्देवीब्रह्ममन्त्रः । उमामहेश्वरमन्त्रः । भूवराहमन्त्रः । श्रीमत्त्रिपुरसुन्दरीमन्त्रः । सिद्धलक्ष्मीराज्यलक्ष्मीपद्मावतीजगद्योनिमन्त्राः । संकर्षणादिमूर्तिचतुष्टयमन्त्राः । वसुधारापद्मनिधिमन्त्रः । ऋद्धिगारुडमन्त्रः । शोषिण्यादिमन्त्राः । ऋद्ध्यादिमन्त्राः । प्रत्यंगिराऋचां प्रयोगाः । अणिमादिमन्त्राः । गुरुपादुकापूजा । देवीरश्मिमालामन्त्रः । गुर्वादिमन्त्राः । नवकूलीमन्त्रः । चतुष्षष्टिसिद्धनामानि । आनन्दभैरवमन्त्रः । वीरावलीमन्त्रः ।

सिद्धमन्त्रः । श्रीविद्यासंपुटविधानं तन्माहात्म्यं च । गायत्रीसंपुटविधानं । देवीनवावरणदेवतामन्त्राः । त्रिपुरानवकमन्त्रः । क्रममालामन्त्राः । लक्ष्मीमन्त्राः । नवावरणलक्ष्मीकवचम् । महागणपतिभुवनेश्वर्यन्नपूर्णाश्यामावाराहीसरस्वतीरेणुकामन्त्राः । शरभसुदर्शनहनुमत्कार्तवीर्यमन्त्राः । अन्ये केचन मन्त्राश्च । प्रायेणैतेषां मन्त्राणां यन्त्राणि प्रयोगाश्च । सर्वदेवतागायत्री । भूभूतशुद्धिः । श्रीचक्रादिनानान्यासाः । अग्निकुण्डजिह्वामालादिलक्षणानि । अन्येऽपि बहवो विशेषा विद्यन्ते ॥

Remarks—The Ms. is in good condition.

இந்நூல் பார்வதிக்கு பரமசிவன் உபதேசித்தது. இது சாக்தர்களுக்கு மிகவும் முக்கியமானது. இதில் சாக்த ஸம்பந்தமான ஸகல தேவதா மந்திரங்களும், யந்திரங்களும், பிரயோகங்களும் இருப்பதுடன், இதர நூல்களில் கிடைக்கக்கூடாத பலமந்திரங்களும், முக்கியமாக தேவீநவாவரண தேவதா மந்திரங்களும் மஹாலக்ஷ்மீமந்திரம் முதலிய அநேக தேவதா மந்திரங்களும் இருக்கின்றன. இது ஓர் சிறந்த நூல்.

SOWBHĀGYARATNĀKARAḤ

ஸௌபாக்கியரத்நாகரம்

Supplemental No. 22. Bundle No. 6. Burnell's No. 6704. Substance—Paper. Sheets—1-440. Script—Devanāgarī. No. of Granthas—9000. Complete—(1–36 Tarangas.) Author—Śrī Vidyānandanātha.

Beginning:

श्रीगणेशाय नमः ॥ श्रीवाग्देव्यै नमः ॥

प्रारम्भे भगणे भङ्गे यन्मदस्यन्दिबिन्दवः ।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम् ॥

End :

त्यक्त्वा कुलं कुलवधूः पुरमध्यवीथ्या

गत्वाऽकुलं मधु निपीय यथेप्सितं या ।

मत्ता परं पुरुषमेत्य तदीयसङ्गा-

त्तुष्टा पुनस्स्वकुलमेति पुनातु सा माम् ॥

श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ।

कृते सौभाग्यरत्नाब्धौ षट्त्रिंशोऽगात्तरङ्गकः ॥

Colophon :

इति श्रीसच्चिदानन्दचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्द-

नाथेन कृते सौभाग्यरत्नाकरे षट्त्रिंशस्तरङ्गः ॥ शुभमस्तु ॥

Subject :

शाक्तसर्वस्वभूतोऽयं ग्रन्थः । त्रिपुरसुन्दर्युपासकानां श्रीविद्याशाक्तानां आवश्यकास्सर्वेऽपि विषया ग्रन्थेऽस्मिन् प्रतिपाद्यन्ते । त्रिपुर-सुन्दरीमन्त्रः । त्रिपुरसुन्दरीसप्तावरणदेवतामन्त्राः साङ्गोपाङ्गाः । न्यासाः । नित्यनैमित्तिककाम्यपूजाविधयः । सौम्योग्रप्रयोगाः । सिद्धिक्रमाश्च वर्ण्यन्ते ॥

Remarks;—The Ms. is in good condition. The Ms. was purchased and brought by Śri Śerfoji Mahārāja from Benares.

இது ஸ்ரீவித்யோபாஸகர்களுக்கு மிக முக்கியமான நூல். இதில் சாக்த ஆன்ஹிகம், பஞ்சதசீ மந்திரம், உபாஸநாவிதிகள் ஸப்தாவரண தேவதா மந்திரங்கள், நித்யநைமித்திககாம்ய பூஜாவிதிகள், க்ரூர ஸெளம்ய பிரயோகங்கள், ஸித்திக்கிரமங்கள் முதலிய பல விஷயங்களும் நன்கு கூறப்பட்டிருக்கின்றன.

॥ सौभाग्यरत्नाकरः ॥

SOWBHĀGYARATNĀKARAH

ஸெளபாக்கியரத்நாகரம்

Supplemental No. 23–24. Bundle No 7 Burnell's No. 6705

& 6706. Sheets—476 & 248. Same as in Ms. No. 6704.

Remarks:—Each Ms. is complete Ms. The 2 Mss. are in good condition. An Index is attached in Ms. No. 6706 which is newly prepared.

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKṢMĪPĪṬHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No. 25. Bundle No. 8. Burnell's No. 6707.
Substance—Paper. Sheets—1-132 (+index 2=134).
Script—Devanāgarī. No. of Granthas—4600. Incomplete
(1-135 paṭalas Complete. 136 paṭala is incomplete.)
Author— शिवपार्वतीसंवादात्मिका

Beginning :

कैलासशिखरे रम्ये रत्नमण्डपमध्यमे ।
दिव्यकल्पतरोर्मूले रत्नसिंहासने शुभे ॥ १ ॥
— — — — — — — — — — ॥
समस्तलोकजननी पार्वती प्राह धूर्जटिम् ॥

End :

प्रसीद देवि पद्माक्षि प्रसीद हरिवल्लभे ।
प्रसीद कमले देवि प्रसीद कमलालये ॥

Colophon :

इत्याकाशभैरवाख्ये महाशैवतन्त्रे साम्राज्यलक्ष्मीपीठिकायां अङ्गदेवतावरणदेवतास्वरूपनिरूपणं नाम पञ्चत्रिंशदुत्तरशततमः पटलः ॥

Subject :

ग्रन्थेऽस्मिन्नसंपूर्णलक्ष्मीस्तुत्यन्ताः 136 पटलाः सन्ति । सर्वलोकक्षेमावहः अखण्डसाम्राज्यदायकः श्रीसाम्राज्यलक्ष्मीमन्त्रः सकल्पस्सप्रयोगरहस्यः साङ्गोपाङ्गः प्रतिपाद्यते । राजावासयोग्यप्रधानराजधानीपुरनिर्माणविधिः

वर्ज्यावर्ज्यदुर्गलक्षणानि वप्रप्राकारादिलक्षणानि धनुर्वेदः नगरादिरक्षाविधिः सिंहासननिर्माणविधिः दण्डयात्राकालः गजाश्वोत्पत्तिः चतुरङ्गबललक्षणं चापाद्यायुधलक्षणं व्यायामः युद्धस्वरूपं वीरगतिः देशक्षोभकरसर्वदोषशान्ति-विधिः इत्यादिका बहवो विशेषाः प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in good condition.

இந்த நூல் பார்வதிதேவிக்கு பரமசிவனால் உபதேசிக்கப்பட்ட ஸ்ரீ ஆகாசபைரவதந்திரம் என்ற பெரும் நூலின் ஒருபாகம்.

இதில் அகண்ட ஸாம்ராஜ்யத்தைத் தரத்தக்க ஸ்ரீஸாம்ராஜ்ய லக்ஷ்மீ மந்திரம் அதன் விநியோகக்கிரமங்கள் அதன் அங்கங்கள் தேவியின் ஸ்வரூபம் பூஜாவிதி பிரயோகங்கள் உத்பாதாதிகளுக்கு சாந்திகள் முதலியன நன்கு கூறப்பட்டிருக்கின்றன.

தவிர ராஜதானீ பட்டணம் இவைகளின் நிர்மாண முறைகள், துர்க்கங்களின் லக்ஷணங்கள், அகிழ் கோட்டைகளின் லக்ஷணங்கள், தநுர்வேதம், நகராதிரக்ஷணம், ஸிம்மாஸந லக்ஷணம் வில் முதலிய ஆயுதங்களின் லக்ஷணம், தண்டயாத்திரை யானை குதிரைகளின் உத்பத்தி, நான்கு வகை ஸைன்யங்களின் லக்ஷணம், தேகாப்யாஸம், சண்டையின் தன்மை, வீரகதி, தேசத்திற்குத் திங்கிழைக்கத்தக்க தைவிக தோஷாதிகளுக்கு பரிஹாரங்கள், முதலிய பல சிறந்த விஷயங்களும் கூறப்பட்டிருக்கின்றன.

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKṢMĪPĪṬHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No. 26. Bundle No. 8. Burnell's No. 6708.
Sheets—1-77. Same as in Ms. No. 6707.

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKṢMĪPĪṬHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No. 27. Bundle No. 8. Burnell's No. 6709.

Substance— —1—13. Script—Devanāgarī.
No. of (21-32 Paṭalās). Author-
शिवपार्वतीसंवादात्मिका ।

Beginning:

श्रीगणेशाय नमः । पार्वत्युवाच—

देवदेव विरूपाक्ष सर्वज्ञ शिव शंकर ।
विधानं तु महाशान्तेस्त्वन्मुखाम्भोजतः श्रुतम् ॥
इदानीं श्रोतुमिच्छामि दुर्गाणां लक्षणं परम् ।

End.

एवं ते राजगेहस्य निर्माणविधिरीरितः ।
संग्रहेण वरारोहे किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इत्याकाशभैरवाख्ये महाशैवतन्त्रे साम्राज्यलक्ष्मीपीठिकायां अन्तः-पुरनिर्माणस्वरूपकथनं नाम द्वात्रिंशः पटलः ॥ इतः परं गृहप्रतिष्ठादि ॥

Subject:

अष्टविधगिरिदुर्गस्वरूपकथनम् । वर्जनीयागिरिदुर्गाष्टकस्वरूपकथनम् । सप्तविधवनदुर्गस्वरूपकथनम् । अष्टविधप्राकारनिर्माणस्वरूपकथनं । उपसाल-स्वरूपकथनं । सालद्वारस्वरूपकथनं । ...निर्माणादिस्वरूप-कथनं । वस्तुसंग्रहस्वरूपकथनं । पुरनिर्माणस्वरूपकथनं । राजास्थान-मण्डपादिनिर्माणस्वरूपकथनं । नवरङ्गकूटादिनिर्माणस्वरूपकथनं । अन्तः-पुरनिर्माणस्वरूपकथनं । इतीमे विषयाः क्रमशो द्वादशसु पटलेषु निरूप्यन्ते ॥

Remarks:—The Ms. is This is a portion of the work in Supp. No. 25 & 26.

॥ धानुष्कश्रमाविधिः ॥

DHĀNUṢKAŚRAMAVIDHIḤ

தானுஷ்கசிரமவிதி

Supplemental No. 28. Bundle No. 8. Burnell's No. 6720.

Substance—Paper. Sheets—1-10. Script—Devanāgarī. No. of Granthas—140. Complete. Author.

पार्वतीपरमेश्वरसंवादात्मकः ।

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । पार्वती—

पदातिलक्षणं देव श्रुतं त्वन्मुखपङ्कजात् ।

इदानीं श्रोतुमिच्छामि चापाद्यायुधलक्षणम् ॥

शराणां चैव लक्ष्यस्य धानुष्कस्य विशेषतः ।

End:

इत्येवं ते समाख्यातं श्रमकर्म यथाक्रमम् ।

संग्रहेण सरोजाक्षि किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति श्रीमच्छैवतन्त्रे साम्राज्यलक्ष्मीपीठिकायां श्रमकर्मस्वरूपनिरूपणं नाम त्रयस्त्रिंशदुत्तरशततमः पटलः ॥ श्रीशिवार्पणमस्तु ॥

Subject:

चापशरधानुष्कलक्षणम् । धानुष्कश्रमस्वरूपं च (साम्राज्यलक्ष्मीपीठिकायां 132&133 पटलौ)

Remarks.—The Ms. is in good condition.

॥ ऋश्यशृङ्गसंहिता ॥ (अनुत्तरब्रह्मतत्वरहस्यं)

RIŚYAŚṚNGASAMHITĀ

ரிச்ய ச்ருங்கஸம்ஹிதை

Supplemental No, 29, Bundle No. 9. Burnell's No. 6711 a & 6711 b. Substance—Paper. Sheets—1-171 & 1-181. Script—Devanāgarī. No. of Granthas—6000 + 4700 = 10700. Complete—(1st & 2nd parts.) Author.

महर्षिभ्यः ऋश्यशृङ्गेन प्रोक्ता ॥

Beginning ;

श्रीगणेशाय नमः ॥ श्रीसाम्बशिवाय नमः ॥

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥
श्रीजानकीशपादाब्जदृढभक्तं जितेन्द्रियम् ।
विभाण्डकसुतं शान्ताभर्तारं तपसां निधिम् ॥

End :

इदं तन्त्रं महद्गुह्यं तारकब्रह्मरूपिणा ।
जानकीपतिना प्रोक्तं जगदानन्दहेतुकम् ॥

Colophon:

इति श्रीमदनुत्तरब्रह्मतत्त्वरहस्ये दाशरथीये वेदार्थसंग्रहे उत्तरभागे सौभाग्योदये राजराजविद्यामाहात्म्ये शास्त्ररहस्यकथनं नाम पञ्चचत्वारिंशोऽध्यायः समाप्तः ॥ श्रीगोविन्दाय नमः ॥ रामचन्द्राय नमः ॥

Subject:

जगत्प्रणवव्याहृतिमातृकाष्टाक्षराद्युत्पत्तिः । अनुत्तरब्रह्मतत्वावतारः । पादुकामन्त्रः । वैष्णवरश्मिमालामन्त्रः । अजपामातृकामन्त्राः । षडक्षराष्टाक्षरादिविष्णुमन्त्राः । तथाविधा नानालक्ष्मीमन्त्राः । तेषां सिद्धिक्रमः । योगस्वरूपोपपादनं । ब्रह्मर्षित्वादिसाधनाविधिः । वसुन्धरानीलादशावतारमूर्तिमन्त्राः । हयाननगरुडसुदर्शनहनूमन्मन्त्राः इत्यमी विषयाः प्रथमखण्डे प्रतिपाद्यन्ते । साम्राज्यलक्ष्म्यादिलक्ष्मीमन्त्रपञ्चकसाधनविधिः । विष्णुवर्मपञ्जरकवचानि । तेषां साधनविधिः । यन्त्राणि । पूजाविधिः । नानाक्षेत्राणां श्रीदेव्याः पीठरूपत्वकथनम् । इत्यादयो बहवो विशेषाः उत्तरखण्डे प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in good condition. The Ms. was purchased and brought by Sri Śarfoji Mahārāja from Benares.

இந்நூல் ருஷ்யசிருங்க மஹரிஷியால் முனிவர்களுக்கு கூறப்பட்டது.

இதில் உலகம், பிரணவம், வியாஹ்ருதி மாத்ருகாக்ஷரங்கள், விஷ்ணு அஷ்டாக்ஷரம், அநந்தராப்ரஹ்மதத்வம், இவைகளின் உத்பத்தியும், பாதுகாமந்திரம், விஷ்ணுபஞ்சரமாலா மந்திரம், அஜபாமாத்ருகா மந்திரங்கள், விஷ்ணு லக்ஷ்மீமந்திரங்களில் 6, 8, 12, 16, 32, 42, அக்ஷரங்களுள்ள பல மந்திரங்களும், விஷ்ணு தசாவதாரமூர்த்தி மந்திரங்களும் பூதேவி, நீலாதேவி, ஹயக்ரீவர், கருடன் ஸுதர்சனம், ஹநுமான் இவர்களின் மந்திரங்களும், இவைகளின் ஸித்தி முறைகளும், யோகஸ்வரூபமும், ப்ரஹ்மரிஷியாக ஆவதற்கு உபாயமும் முதல் பகுதியில் கூறப்பட்டிருக்கின்றன.

இரண்டாம் பகுதியில் ஸாம்ராஜ்ய லக்ஷ்மீ முதலிய ஐந்து லக்ஷ்மீமந்திரங்களும், தேவீரச்மிமாலையும், விஷ்ணுவர்ம பஞ்சரகவசங்களும் அவைகளின் ஸித்திக்கிரமங்களும் யந்திரங்களும் பூஜாவிதியும் கூறப்பட்டிருக்கின்றன.

॥ तन्त्रसारः ॥

TANTRASĀRAH

தந்திரஸாரம்

Supplemental No. 30. Bundle No. 9. - Burnell's No 6712
Substance—Paper. Sheets—1-165, Script—Devanāgarī.
No. of Granthas—8000 (10000.) Complete (2 Paṭalas.)
Author—Mahāmahopādhyāya Krisṇānanda.

Beginning :

॥ श्रीगणेशाय नमः ॥ शङ्कराय नमः ॥

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितम् ।
गुरुं च ज्ञानदातारं कृष्णानन्देन धीमता ॥
तत्तद्ग्रन्थगतान्वाक्यान्नानार्थं प्रतिपाद्य च ।
सौकर्यार्थं च संक्षेपात्तन्त्रसारः प्रतन्यते ॥

End :

उत्पातः स्वर्गलोके स्यात्पाताळे च धनक्षयः ।
मर्त्यलोके स्थिते वह्नावभीष्टफलद्म(संप)दः ॥
इति अग्निस्थितिविधिः । शुभं भूयात् ॥ ग्रन्थसंख्या ८००१ ॥

Colophon :

इति श्रीमहामहोपाध्याय श्रीकृष्णानन्दवागीशभट्टाचार्यविरचिते तन्त्रसारे द्वितीयः पटलः ॥

Subject :

पञ्चदेवताप्रधानमन्त्राः । तेषां पुरश्चरणं । पूजा । पुरश्चर्यायां देशकालेतिकर्तव्यतानियमाः । अग्निकुण्डमालादिविधिः । रक्षाविधिः । कवचं । स्तोत्राणि । पञ्चदेवतात्रिपुराबालादुर्गाछिन्नमस्तानित्यक्लिन्नातारादिगायत्र्यः । एतेषां मन्त्रयन्त्रस्तोत्रकवचप्रयोगाः । पञ्चदेवतापञ्चायतनक्रमः । तेषां प्रत्येकं संग्रहेण पूजाविधिः । त्रिपुरसुन्दरीमहापूजानैमित्तिकपूजाविधिः । तन्त्रग्रन्थसामान्यविषयाः । सर्वयज्ञापेक्षया जपयज्ञस्यैव निश्श्रेयससाधनत्वं । इत्यादयो विशेषाः प्रतिपाद्यन्ते ॥

Remarks:—The Ms. is in fairly good condition. The Ms was purchased and brought by Sri Serfoji Mahārājā from Benares.

இந்நூல் கிருஷ்ணானந்தரால் இயற்றப்பட்டது.

இதில், கணபதி, தேவி, ஸூரியன், பரமேசுவரன், விஷ்ணு ஆகிய ஐந்து தேவதைகளின் முக்கிய மந்திரங்களும் அவைகளின் ஸித்தி முறைகளும், பஞ்சாயதன பூஜையின் விதிகளும் பஞ்சதேவதைகள், திரிபுரை, பாலை, துர்கை, சின்னமஸ்தை, நித்தியக்லின்னை, தாரை முதலிய தேவதைகளின் காயத்திரிகளும், திரிபுரஸுந்தரீ மஹாபூஜா விதியும், நைமித்திக பூஜா விதியும், ஜபயஞ்ஞம் ஒன்றே முக்தியைத் தரத்தக்கது என்பதும் இதுபோன்ற மற்றும் பலவிஷயங்களும் கூறப்பட்டிருக்கின்றன.

॥ अग्निकार्यविधिः [देवीदीक्षार्थकः] ॥

AGNIKĀRYA VIDHIḤ

அக்கி கார்யவிதி

Supplemental No. 31. Bundle No. 10. Burnell's No. 6713. Substance—Paper. Sheets—1—24. Script—Devanāgarī. No. of Granthas—250. Complete.

Beginning :

श्रीगणेशाय नमः ॥ आचार्यः कुण्डस्य पश्चिमतः प्राङ्मुख उपविश्य गोमयोपलिप्ते भूप्रदेशे सिन्दूरादिना कृतवृत्तमण्डलान्तस्स्वासनमास्तीर्य ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य तत्र प्राङ्मुख उपविश्य भूशुद्धिं भूतशुद्धिं च विधाय कुण्डं गोमयेनोपलिप्तं अष्टादशभिस्संस्कारैस्संस्कुर्यात् ॥

End :

अनृणा अस्मिन्ननृणाः परस्मिन्तृतीये लोके अनृणास्स्याम । ये देवयाना उत पितृयानास्सर्वाण्यथो अनृणा आक्षियेम ॥

पात्राणि पूर्वक्रमेण द्वन्द्वश उत्सृज्य,—

यस्य स्मृत्या च नामोक्त्या तपोहोमक्रियादिषु ।

न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मन्त्रहीनं + तदस्तु ते ॥

अनेनाग्निकहोमेनेष्टदेवताः प्रियन्ताम् ॥

मन्त्रशास्त्रोक्ताग्निमुखम् ॥ —

Subject :

ऋग्वेदिनां मन्त्रदीक्षादिकार्योपयुक्तः अग्निकार्यविधिः ॥

Remarks :— The Ms. is in good condition.

இந்நூல் ருக்வேதிகளுக்கு மந்திரதீக்ஷை முதலிய கார்யங்களுக்கு உபயோகமான ஹோமத்தின் ஆரம்பத்தில் செய்யக்கூடிய தந்திரஸம்பந்தமுள்ள அக்னிகாரிய விதிகளைக்கூறுகிறது.

॥ मन्त्रमहोदधिः ॥

MANTRAMAHODADHIH

மந்திரமஹோததி

Supplemental No. 32. Bundle No. 10. Burnell's No. 6714 Substance—Paper. Sheets—1—169+10Index=179. Script—Devanāgarī. No. of Granthas—3250. Complete—(1–25 Tarangas). Author—Sri Mahīdhara Bhaṭṭācārya.

Beginning :

प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुम् ।
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिम् ॥

End :

विश्वेशो गिरिजा डुण्ढिर्माधवो मणिकर्णिका ।
भवानी जाह्नवी दण्डपाणिर्मे तन्वतां शिवम् ॥
विक्रमार्काद्गते वर्षे बाणनेदनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥

Colophon :

इति श्रीमहीधरविरचिते मन्त्रमहोदधौ षट्कर्मादिनिरूपणं नाम पञ्चविंशतिस्तरङ्गः ॥ श्रीरस्तु ॥ श्रीसदाशिवार्पणमस्तु ॥ संवत् १७४५ वर्षे मार्गशीर्षवद्यद (वद्य) बुधे लिखितमिदं पुस्तकं स्वयं पठनार्थम् ॥ शुभं भवतु ॥ कल्याणम् ॥ ततश्च श्रीकण्ठादिमातृका-न्यासदेवताश्च भवन्ति ॥ ततोपि, याद्दशी पुस्तकं दृष्ट्वा ताद्दशी लिखिते मया । यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ श्रीरस्तु ॥ इति च ॥

Subject :

सुप्रसिद्धोऽयं ग्रन्थः । ग्रन्थेऽस्मिन् पञ्चदेवतामुख्यमन्त्राः । वल्लभेशादिगणेशावतारमूर्तिमन्त्राः । नीलकण्ठाघोरादिशिवावतारमूर्तिमन्त्राः । त्रिपुरसुन्दर्यन्नपूर्णादिदेव्यवतारमूर्तिमन्त्राः रामकृष्णादिविष्णववतारमूर्तिमन्त्राः । सूर्याष्टाक्षर्यादिमन्त्राः । तेषामावरणदेवतामन्त्राः । तेषां परिवारदेवतामन्त्राः । लोकदेवतामन्त्राः । न्यासमन्त्रः । गन्धर्वयक्षिण्यादिमन्त्राः । अग्निकुण्डस्रुक्स्रुवमालादिलक्षणानि । तान्त्रिकग्रन्थसामान्यास्सर्वेऽपि विषयाः सम्यङ्निरूप्यन्ते । मुख्यदेवतामन्त्राणां सर्वेषामपि न्यासाः पीठपूजा आवरणपूजा यन्त्राणि सिद्धिक्रमः प्रयोगाश्च प्रतिपाद्यन्ते । प्रायेण सर्वेषामपि मन्त्राणां यन्त्राणि प्रयोगाश्च भवन्ति ॥

Remarks:—The Ms. is in good condition and old.

Supplemental No. 428. Burnell's No. 7078. Sheet—1. No. of Granthas—5.

Subject:

सन्तानदुर्गामन्त्रस्य ऋष्यादिन्यासमात्रम् ॥

All the other particulars are the same as in Ms. No. 7077.

॥ ब्रह्मास्त्रमन्त्रः ॥

BRAHMĀSTRAMANTRAḤ

ப்ரஹ்மாஸ்திரமந்திரம்

Supplemental No. 429. Bundle No. 15. Burnell's No. 7079. Substance — Paper. Sheet—1. Script — Devanāgarī. No. of Granthas—4. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ अस्य श्रीब्रह्मास्त्रमन्त्रस्य ॥

End :

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ।

Colophon : Nil.

Subject :

ब्रह्मास्त्रमन्त्रन्यासमात्रम् ॥ ब्रह्मास्त्रमन्त्रस्तु ग्रन्थान्तरेषु संपूर्णतया विद्यत एव ॥

Remarks:—The Ms. is in good condition.

॥ गन्धर्वसाधनं ॥

GANDHARVASĀDHANAM

கந்தர்வஸாதனம்

Supplemental No. 430. Bundle No. 15. Burnell's No. 7080.
Substance—Paper. Sheets—1-4. Script—Devanāgarī.
No. of Granthas—47. Complete.
Author:— गन्धर्वतन्त्रम् ।

Beginning:

श्रीगुरुभ्यंन्न(भ्यो न)मः ॥ देव्युवाच —
महार्चनक्रमं देवी सूचितं न प्रकाशितम् ।
कथयस्व महादेव सर्वसिद्धिकरं महत् ॥

End:

अन्ये देवसपर्यां वा अन्यदेवस्य कीर्तनम् ।
गुरुदेवं विना देवी तदग्रे नरकं व्रजेत् ॥

Colophon:

इति गन्धर्वतन्त्रे ईश्वरपार्वतीसंवादे वीरसाधनं नाम० ॥

Subject:

वीरसाधनप्रकारमात्रकथनं ॥ मन्त्रस्तु न प्रकाशितः ॥

Remarks:—The Ms. is in good condition and copied.

॥ धनदासिद्धिक्रमः ॥

DHANADĀSIDDHIKRAMAḤ

தநதாஸித்திக்கிரமம்

Supplemental No. 431. Bundle No. 15. Burnell's No. 7081.
Substance—Paper. Sheets—3. Script—Devanāgarī.
No. of Granthas—15. Complete. Author—Nil.

Beginning :

श्रीगुरवे नमः ॥

एवंगुणविशेषणेति धनदार्चिताराधनं करिष्य इति संकल्प्य ॥

End :

तर्पणं मार्जनं चैव द्विजभोजनकं तथा ।

कर्तव्यं च यथाशक्त्या यथाक्रमविधानतः ॥

Colophon :

इति धनदार्चितापटलम् ॥ शंकरो जयति ॥ शुभमस्तु ॥

Subject :

धनदारतिप्रियायक्षिणीमन्त्राः । तत्साधनक्रमश्च ॥

Remarks :—The Ms. is in good condition.

॥ अन्नपूर्णामन्त्रः ॥

ANNAPŪRṆĀMANTRAḤ

அந்நபூர்ணமந்திரம்

Supplemental No. 432. Bundle No. 15. Burnell's No. 7082. Substance — Paper. Sheets—2. Script — Devanāgarī. No. of Granthas—15. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

अस्य श्रीअन्नपूर्णामन्त्रस्य । ब्रह्मा ऋषिः । अन्नपूर्णेश्वरी सिद्धाविद्या देवता ॥

End :

भूबिम्बं परमेशानि तारं मध्ये विनिक्षिपेत् ।

कोणत्रये त्रिबीजानि प्रादक्षिण्येन योजयेत् ॥

Colophon : Nil.

Subject:

अन्नपूर्णामन्त्रस्य ऋष्यादिन्यासः । ध्यानम् । वर्णन्यासः, पदन्यासः, व्यापकन्यासश्च । मन्त्रस्तु न प्रकटितः ॥

Remarks :—The Ms. is in decaying condition.

॥ दशविधमातृकान्यासः ॥

DAŚAVIDHAMĀTṚKĀNYĀSAḤ

தசவிதமாத்ருகாந்யாஸம்

Supplemental No. 433. Bundle No. 15. Burnell's No. 7083. Substance — Paper. Sheets—1-10. Script – Devanāgarī. No. of Granthas—100. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीसरस्वत्यै नमः ॥

अथ बालामातृकान्यासविधिरुच्यते । अस्य श्रीबालासंपुटित-मातृकान्यासस्य ॥

End :

सं शुक्लात्मकहंसप्रभाभ्यां नमः । हं प्राणात्मकवराहनि० ॥

Colophon : Nil.

Subject :

बालाभुवनेशीलक्ष्मीकामश्रीविद्याश्रीकण्ठादिकेशवादिमातृकान्यास-सप्तकम् ॥ केशवादिन्यासेऽपि हंबीजन्यासो न समाप्तः ॥

Remarks :—The Ms. is in good condition.

॥ अमृतमृत्युञ्जयमन्त्रः ॥

AMṚTAMṚTYUÑJAYAMANTRAḤ

அம்ருதம்ருத்யுஞ்ஜயமந்திரம்

Supplemental No. 434. Bundle No. 15. Burnell's No. 7084. Substance — Paper. Sheet—1. Script — Devanāgarī. No. of Granthas—20. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ अमृतमृत्युञ्जयमन्त्रः ॥ श्रीगुरुभ्यो नमः ।

गुरवे सर्वलोकानां + नमः ॥

End:

इत्यभीष्टसंख्यया जप्त्वा पूर्ववत् उत्तरन्यासादिपञ्चोपचारान्कुर्यात् ॥ श्रीशुभमस्तु ॥

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः अमृतमृत्युञ्जयत्र्यक्षरीमन्त्रः ॥

Remarks:—The Ms. is in good condition.

॥ मृत्युञ्जयविधानम् ॥

MṚTYUÑJAYAVIDHĀNAM

மிருத்யுஞ்ஜயவிதாநம்

Supplemental No. 435. Bundle No. 15. Burnell's No. 7035. Substance—Paper. Sheet—1. Script — Devanāgarī. No. of Granthas—25. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ महारुद्राय नमः ॥

आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतिश्च
प्रोच्चार्य त्र्यंबकं यो जपति मृतिहरं भूय एवैतदाद्यम् ।
कृत्वा न्यासं षडङ्गं स्रवदमृतरुचेर्मण्डलान्तःप्रविष्टं
ध्यात्वा योगेशरुद्रं स जयति मरणं शुक्रविद्याप्रसादात् ॥

End :

त्रिविधमृत्युञ्जयमूलमन्त्रः ॥

Colophon :

इति मृत्युञ्जयविधानं समाप्तम् ।

Subject :

ऋष्यादिन्यासपदन्यासध्यानोपेतः अमृतमृत्युञ्जयाख्यः त्रिविधः शुक्रविद्यामन्त्रः ॥

Remarks :— The Ms. is in decaying condition.

॥ पञ्चाक्षरमन्त्रभेदाः ॥

PAÑCĀKṢARAMANTRABHEDĀḤ

பஞ்சாக்ஷரமந்திரபேதங்கள்

Supplemental No. 436. Bundle No. 15. Burnell's No. 7086.
Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—6. Incomplete. Author—Nil.

Beginning :

शि । घं वायनमशि । टं ठं डं रं क्षं ऋं औं झं ढं धं भं वं छं
वायनमाशि । ऊं वायनमाशि ॥

End :

औं सौं शरवणभवाय ॥ ओं जुं मः मृत्युंजयाय नमः ।

Colophon : Nil.

Subject :

केचन पञ्चाक्षरमन्त्रभेदाः । सुब्रह्मण्यमन्त्रः । मृत्युञ्जयमन्त्रश्च ॥

Remarks :—The Ms. is in good condition.

॥ मृत्युञ्जयमन्त्रः ॥

MṚTYUÑJAYAMANTRAḤ

மிருத்யுஞ்ஜயமந்திரம்

Supplemental No. 437. Bundle No. 15. Burnell's No. 7087.
Substance — Paper. Sheets—2. Script — Devanāgarī.
No. of Granthas—23. Complete. Author—Nil.

Beginning :

श्रीगुरुभ्यो नमः ॥ श्रीदक्षिणामूर्तये नमः ॥ श्रीसरस्वत्यै नमः ॥
ओं अस्य श्रीमहामृत्युञ्जयमन्त्रस्य । मैत्रावरुणपुत्रो वसिष्ठ ऋषिः ।

End :

त्रियंबकं यजामहे + मामृतात् ॥

Colophon : Nil.

Subject :

ऋष्यादिन्यासोपेतः त्र्यम्बकमृत्युञ्जयमन्त्रः ॥

Remarks :—The Ms. is in decaying condition and copied.

॥ भैरवावरणपूजाक्रमः ॥

BHAIRAVĀVARAṆAPŪJĀKRAMAḤ

பைரவாவரணபூஜாக்கிரமம்

Supplemental No. 433. Bundle No. 15. Burnell's No. 7088.
Substance — Paper. Sheets—2. Script — Devanāgarī.
No. of Granthas—15. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

अथ यन्त्रपूजाप्रकारः ॥ प्रथमं द्वारपूजां कुर्यात् ॥ पूर्वद्वारे सुराय नमः ॥

End :

राजसर्षपमुद्गान्नं तिलमध्वाज्यपायसैः ।
माषापूपैर्नारिकेलैरष्टद्रव्यैर्हुनेत् ... ॥

Colophon : Nil.

Subject :

भैरवयन्त्रे सप्तावरणपूजाक्रमः ॥ पुरश्चर्यायाः अष्टद्रव्याणि च ॥

Remarks :—The Ms. is in good condition.

॥ स्वर्णाकर्षणभैरवमन्त्रः ॥

SVARṆĀKARṢAṆABHAIRAVAMANTRAḤ

ஸ்வர்ணாகர்ஷணபைரவமந்திரம்

Supplemental No. 439. Bundle No. 15. Burnell's No. 7089.

Substance— Paper. Sheets—2. Script—Devanāgarī
No. of Granthas—13. Complete. Author—Nil.

Beginning :

श्रीरस्तु ॥

अस्य श्रीस्वर्णाकर्षणभैरवमन्त्रस्य । ब्रह्मा ऋषिः । त्रिष्टुप्छन्दः ।

End:

एवं मन्त्रजपावृत्या अष्टपञ्चाक्षरै० ॥ श्रीरस्तु ॥

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः स्वर्णाकर्षणभैरवमन्त्रः ॥

Remarks:—The Ms. is in good condition.

॥ महाषोडशीदीक्षासंग्रहः ॥

MAHĀṢOḌAŚĪDĪKṢĀSAṄGRAHAḤ

மஹாஷோடசீதீக்ஷாஸங்கிரகம்

Supplemental No. 440 Bundle No. 15. Burnell's No. 7090.
Substance — Paper. Sheets—1-6. Script—Devanāgarī.
No. of Granthas—77. Complete. Author—Nil.

Beginning :

अथ श्री(च)क्रपादोदकमाहात्म्यम् ॥

गङ्गापुष्करनर्मदादियमुनागोदावरीगोमती-

गङ्गाद्वारगयाप्रयागबदरीवाराणसीसिन्धुषु ।

रेवासेतुसरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरे

तीर्थस्नानसहस्रकोटिफलदं श्रीचक्रपादोदकम् ॥

End :

अथ गुरुपादुकामन्त्रोद्धारः ॥ ह्स्रूं हसक्षमलवयरां हसक्षमलवयरूं
हसक्षमलवयरीं ह्स्रूं हसक्षमलवयरूं श्रीशंभुगुरुह्स्रूं ॥ इति
पादुकामन्त्रोद्धारः ॥

Colophon : Nil.

Subject:

श्रीचक्रोदकमाहात्म्यं । दर्शनफलं । श्रीचक्रनिर्माणविधिः । प्रतिष्ठाविधिः । श्रीचक्रनाशे प्रायश्चित्तम् । श्रीविद्यार्णवसंहारन्यासः । सृष्टिन्यासः । पञ्चदशीन्यासः । श्रीविद्यासृष्टिन्यासः । स्थितिन्यासः ॥ महाषोडशीमन्त्रः ॥ संग्रहेण महाषोडशीदीक्षाविधिः । गुरुपादुकामन्त्रोद्धारः ॥

Remarks :—The Ms. is in decaying condition and copied.

॥ पाशुपतास्त्रमन्त्रः ॥

PĀŚUPATĀSTRAMANTRAḤ

பாசுபதாஸ்திர மந்திரம்

Supplemental No. 441. Bundle No. 15. Burnell's No. 7091. Substance—Paper. Sheet — 1. Script -- Devanāgarī. No. of Granthas—12. Complete. Author.—Nil.

Beginning:

श्रीपशुपतये नमः ॥

अस्य श्रीपाशुपतास्त्रस्य श्रीवामदेवाय ऋषये नमः शिरसि ॥

End :

उत्तरन्यासं विधाय ध्याय मनसा संपूज्य गुह्यातीत्यनेन पशुपतिदेवाय जपं समर्पयेदिति पाशुपतास्त्रविधिः ।

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः पाशुपतास्त्रजपविधिः । मन्त्रस्तु स्वरूपतो नोपपादितः ॥

Remarks:—The Ms. is in good condition.

॥ पाशुपतकल्पः ॥

PĀŚUPATAKALPAḤ

பாசுபதகல்பம்

Supplemental No. 442. Bundle No. 15. Burnell's No. 7092. Substance—Paper. Sheets—4-8(=5). Script—Devanāgarī. No. of Granthas—54. Incomplete. Author—Nil.

Beginning:

घु घु घु घु । ना ना ना ना । अनाते । अभस्मः । अधूमः । अनग्निः । अरूपः । आज्योतिः ।

End:

अनन्तायै नमः ॥ अनाथायै नमः ॥ अनाश्रितायै शक्त्यै नमः ॥ शिवाय गुरवे नमः ॥

Colophon:

इत्यागमोक्ते पाशुपतकल्पे षडध्वान्यासः समाप्तिमगमत् ॥

Subject:

आगमोक्तः पाशुपतषडध्वन्यासः ॥ 1-3 पत्राणि मातृकायां न विद्यन्ते । अतोऽयमसमग्रो ग्रन्थः ॥

Remarks:—The Ms. is in decaying condition and copied.

॥ सांख्यायनतन्त्रम् ॥

SĀṄKHYĀYANATANTRAM

ஸாங்கியாயநதந்திரம்

Supplemental No. 443. Bundle No. 15. Burnell's No. 7093. Substance—Paper. Sheets—1-45+1(=46.) Script—Devanāgarī. No. of Granthas—450. Complete. (1-33 पटलाः) Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥

मध्ये सुधाब्धि मणिमण्डपरत्नवेद्यां
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषणाङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥

End:

उष्णोदकं ताम्रपात्रे त्रिसप्तमभिमन्त्रयेत् ।
नानाशूल्यश्च हृद्रोगं नाशमायाति पुत्रकः(क) ॥

Colophon :

इति षड्विधागमे सांख्यायनतन्त्रे उपसंहारप्रयोगं नाम त्रिंशि-(त्रयस्त्रिं)शः पटलः ॥

Subject :

ब्रह्मास्त्रदेवतायाः प्रत्यङ्गिरायाः एकाक्षरचतुरक्षराष्टाक्षरषट्त्रिंशदक्षर-शताक्षराष्टाविंशत्यधिकशताक्षरमन्त्राः । देवतान्तरमन्त्रोपेता अन्ये केचन मन्त्राः । तेषां सिद्धिक्रमः । मालाद्रव्यनियमः । सन्ध्याविधिः । गायत्रीप्रयोगाः । नानासिद्धिदहोमतर्पणादि-प्रयोगाः । मूर्तिनिर्माणविधिः । यन्त्रविधिः । पूजाविधिः । गतिमत्यादिस्तंभनप्रयोगः । रणस्तंभनकरपञ्चायुधमन्त्रप्रयोगाः । बगळाहृदयमन्त्रः । उपसंहारमन्त्रः । रोगहरप्रयोगाश्च ॥

Remarks :—The Ms. is in good condition. The very same Tantra is contained in Ms. No. 12162 (b) Ll. 21—39. No. 12162 has been copied. (No. 582).

॥ दक्षिणकाळीमन्त्रः ॥

DAKṢIṆAKĀLĪMANTRAḤ

தக்ஷிணகாளீ மந்திரம்

Supplemental No. 444. Bundle No. 15. Burnell's No. 7094. Substance—Paper. Sheets—2. Script — Devanāgarī. No. of Granthas—13. Complete. Author—Nil.

Beginning :

श्रीमहागणपतये नमः ॥

ओं ह्रीं क्ष्म्रीं हुं महाकाळाय ह्रौं महादेवाय क्रीं काळिकायै ह्रौं ॥

End :

इति मालां शिरसि निधाय प्रणवं विद्यारत्नादि यथोक्तं कुर्यात् ॥

शुभमस्तु ॥

Colophon : Nil.

Subject :

दक्षिणकाळीजपक्रमः ॥

Remarks :— The Ms. is in good condition.

॥ सप्तशतीऋष्यादयः ॥

SAPTAŚATĪRṢYĀDAYAḤ

ஸப்தசதீ ருஷ்யாதிகள்

Supplemental No. 445. Bundle No. 15. Burnell's No. 7035. Substance — Paper. Sheet—1. Script — Devanāgarī. No. of Granthas—9. Incomplete. Author—Nil.

Beginning :

अस्य श्रीसप्तशत्या मालामन्त्रस्य सांगोपाङ्गस्य मार्कण्डेयब्रह्मविष्णु-

महेश्वरात्मको भगवान् सुमेधा ऋषिः ।

End:

सर्वकार्यसिद्ध्यर्थे जपे विनियोगः ॥

Colophon : Nil.

Subject :

सप्तशतीमालामन्त्रस्य ऋष्यादिविनियोगान्तविषयः ॥

Remarks:— The Ms. is in good condition.

|| प्रत्यङ्गिरामन्त्रः ||

PRATYANGIRĀMANTRAH

ப்ரத்தியங்கிராமந்திரம்

Supplemental No. 446. Bundle No. 15. Burnell's No. 7096.
Substance—Paper. Sheets—1-9. Script — Devanāgarī.
No. of Granthas—119. Incomplete. Author—Nil.

Beginning :

श्रीगणेश प्रसन्न ||

देशकालौ संकीर्त्य सर्वारिष्टशान्त्यर्थं प्रत्यंगिर(रा)समस्तसूक्तानां मन्त्रपठनं करिष्ये ||

End :

ओं तत्सवितुर्वे॰ प्रचोदयात् || ओमापो ज्योतिसुव॰ ||

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः दिग्बन्धनमन्त्रोपेतः प्रत्यङ्गिराऋङ्मन्त्र-कलापः ||

Remarks:—The Ms. is in good condition.

|| पुत्रप्रदमन्त्रः ||

PUTRAPRADAMANTRAH

புத்ரப்ரதமந்திரம்

Supplemental No. 447. Bundle No. 15. Burnell's No. 7097.
Substance—Paper. Sheets—2. Script — Devanāgarī.
No. of Granthas—4. Complete.
Author— ऋग्वेदमन्त्रः ||

Complete Text:

श्रीलक्ष्मीनृसिंह प्रसन्न ||

आचम्य प्राणानायम्य देशकालौ संकीर्त्य ममास्यां भार्यायां

उत्पत्स्यमानगर्भस्य पुंरूपतासिद्ध्यर्थं ऋग्विधानोक्तप्रकारेण अष्टोत्तरसहस्रसंख्यया विष्णोश्रेष्ठेनेत्यृक्जपं करिष्ये ॥

विष्णो श्रेष्ठेनेत्यस्य मन्त्रस्य । त्वष्टा ऋषिः । विष्णुर्देवता । अनुष्टुप् छन्दः । ममास्यां भार्यायामुत्पत्स्यमानगर्भस्य पुंरूपतासिद्ध्यर्थे जपे विनियोगः ।

विष्णो॒ श्रेष्ठे॑न रू॒पेणा॒स्यां नार्यां॑ गवी॒न्यां॑ ।
पुमां॑सं पु॒त्राना धे॑हि दश॒मे मा॒सि जाय॑ते ॥

॥ श्रीलक्ष्मीनृसिंह्म प्रसन्न ॥

Subject :

समुचिते काले मन्त्रबलात् गर्भस्थशिशोः पुंस्त्वापादनसमर्थः विष्णुदेवताकः ऋग्वेदान्तर्गतः ऋङ्मन्त्रः ॥

Remarks:—The Ms. is in good condition and copied.

॥ स्वयंवरामन्त्रः ॥

SVAYAMVARĀMANTRAḤ

ஸ்வயம்வரா மந்திரம்

Supplemental No. 448. Bundle No. 15. Burnell's No. 7098. Substance — Paper. Sheets—2. Script — Devanāgarī. No. of Granthas—8. Complete. Author—Nil.

Beginning :

बालार्कयुतसुप्रभां + इष्टार्थदां पार्वतीम् ॥

End:

पक्षिदुर्गामूलमन्त्रः ॥

Colophon : Nil.

Subject:

ध्यानमात्रोपेतः स्वयंवरापार्वतीमन्त्रः पक्षिदुर्गामन्त्रश्च ॥

Remarks:—The Ms. is in good condition.

॥ अजपैकदेशमात्रम् ॥

AJAPAIKADEŚAMĀTRAM

அஜபா ஏகதேசம் மட்டும்

Supplemental No. 44ɜ b. Burnell's No. 7.98 b. Sheets—2. No. of Granthas—5.

Remarks:—

१२ पत्रात्मिकेति निर्दिष्टायां मातृकायां आदौ पत्रद्वयमेवावशिष्टं अनुपयुक्तं च ॥

॥ दिग्देवताबलिविधिः ॥

DIGDEVATĀBALIVIDHIḤ

திக்தேவதாபலிவிதி

Supplemental No. 449. Bundle No. 15. Burnell's No. 7099. Substance — Paper. Sheets— 3. Script — Devanâgarī. No. of Granthas—35. Complete. Author— Nil.

Beginning :

श्रीगणेशाय नमः ॥

अस्मिन् शुभदिने सर्वारिष्टनिरासद्वारा सर्वेष्टलाभार्थं मण्डपादिदेवतासाकल्यबलिप्रदानं करिष्ये इति संकल्प्य ॥

End :

अन्तरिक्षदिग्वासिभ्यः सर्वतो दिग्वासिभ्यश्च ॥

इन्द्राग्निमध्ये ॥

Colophon : Nil.

Subject :

मण्डपादिदेवताबलिदानविधिः ।

Remarks :—The Ms. is in good condition.

॥ वटुकबलिविधिः ॥

VAṬUKABALIVIDHIḤ

வடுகபலிவிதி

Supplemental No. 450. Bundle No. 15. Burnell's No. 7100.
Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—10. Complete. Author—Nil.

Beginning :

बलिदानेन सन्तुष्टो वटुकस्सर्वसिद्धिदः ।
शान्ति करोतु मे नित्यं भूतवेतालसेवितः ॥

End:

सोहं भैरवमर्चयेत्प्रतिदिनं तारागणैरक्षतैः
आदित्यादिनवग्रहैश्च कुसुमं इष्टार्थसंसिद्धये ॥

Colophon: Nil.

Subject :

वटुकभैरवादिबलिदानमन्त्राः प्रार्थनानि वा ॥

Remarks:—The Ms. is in good condition.

॥ वटुकबलिविधिः ॥

VAṬUKABALIVIDHIḤ

வடுகபலிவிதி

Supplemental No. 451. Burnell's No. 7101. All the other particulars are the same as in Ms. No. 7100.

॥ शतचण्डीपद्धतिः ॥

ŚATACAṆḌĪPADDHATIḤ

சதசண்டீ பத்ததி

Supplemental No. 452. Bundle No. 15. Burnell's No. 7102.

Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—91. Complete.
Author— कमलाकरभट्टः ।

Beginning :

ओं नमश्चण्डिकायै नमः ॥

नत्वा गणेश्वरं देवीं पितरौ राघवं शिवम् ।
रामकृष्णतनूजेन कमलाकरशर्मणा ॥

End:

कपिले सर्वभूतानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मात् अतश्शान्तिं प्रयच्छ मे ॥
इति मन्त्रेण दद्यात् ॥ ततः बलिं दद्यात् ॥

Colophon :

इति शतचण्डीपद्धतिः संपूर्णम् ॥ श्रीदेव्यार्पणमस्तु ॥

Subject :

शतचण्डीपूजाहोमादिविधिः ॥

Remarks:—The Ms. is in decaying condition and folded.

॥ स्वप्नवाराहीमन्त्रः ॥

SVAPNAVĀRĀHĪMANTRAḤ

ஸ்வப்நவாராஹீமந்திரம்

Supplemental No. 453. Bundle No. 15. Burnell's No. 7108.
Substance—Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—6. Complete. Author—Nil.

Beginning:

श्रीसुन्दरीशंकराभ्यां नमः ॥

ओं अस्य श्रीस्वप्नवाराहीमन्त्रस्य धरणीवराहऋषिः ॥

Colophon : Nil.

Subject :

ऋष्याद्युपेतः स्वप्नवाराहीमन्त्रः ॥ सिद्धिक्रमश्च ।

Remarks :—The Ms. is in decaying condition.

॥ संवित्सेवनमन्त्रः ॥

SAMVITSEVANAMANTRAḤ

ஸம்வித்ஸேவநமந்திரம்

Supplemental No. 454. Bundle No. 15. Burnell's No. 7104.
Substance — Paper. Sheet—1. Script —Devanāgarī.
No. of Granthas—12. Complete. Author—Nil.

Beginning :

श्रीगुरुभ्यो नमः ॥

ओं अस्य श्रीसंवित्सेवनमन्त्रस्य आनन्दभैरव ऋषिः ॥ अमृत-
विराट् छन्दः ॥

End :

सर्वतत्वेन महाकारणदेहं शो० ॥ देवगुरुशक्तिशेषं भक्षयेत् ॥
ओं आर्द्रं ज्योतिर्ज्वलति ॥

Colophon: Nil.

Subject :

कौलिकानां कलञ्जभक्षणाख्यसंवित्सेवनापरनामधेयस्य मन्त्रः ॥

Remarks:—The Ms. is in good condition and folded.

॥ वासुदेवमन्त्रः ॥

VĀSUDEVAMANTRAḤ

வாஸுதேவ மந்திரம்

Supplemental No. 455. Bundle No. 15. Burnell's No. 7105.

Substance — Paper. Sheet—1. Script—Telugu. No. of Granthas—17. Complete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ वासुदेवद्वादशाक्षरमन्त्रः ॥
श्रीगुरुभ्यो नमः ॥ गुरवे सर्वलोकानां + नमः ॥

End:

इत्यभीष्टसंख्यया जप्त्वा पूर्ववदुत्तरन्यासादिकं कुर्यात् ॥
शुभमस्तु ॥

Colophon: Nil.

Subject:

ऋष्यादिन्यासध्यानोपेतः वासुदेवद्वादशाक्षरमन्त्रः ।

Remarks:—The Ms. is in good condition.

॥ वासुदेवावरणम् ॥

VĀSUDEVĀVARAṆAM

வாஸுதேவாவரணம்

Supplemental No. 456. Bundle No. 15. Burnell's No. 7106. Substance—Paper. Sheet—1. Script — Telugu. No. of Granthas—10. Incomplete. Author—Nil.

Beginning:

अथ वासुदेवावरणं ॥ अथ प्रथमावरणं । अग्नीशासुरवायुकोणेषु
मध्ये च । ओं हृदयाय नमः ॥

End:

हं ईशानाय । अं ब्रह्मणे नमः । ह्रां अनन्ताय । इति प्रागादि-
प्रादक्षिण्येन पूजयेत् ॥ इति चतुर्थम् ॥

Colophon: Nil.

Subject:

वासुदेवावरणदेवतासु प्रथमादिचतुर्थावरणान्वदेवताः ॥

Remarks:—The Ms. is in good condition.

॥ वासुदेवावरणम् ॥

VĀSUDEVĀVARAṆAM

வாஸுதேவாவரணம்

Supplemental No. 457. Burnell's No. 7107. Script—Devanāgarī. All the other particulars are the same as in Ms. No. 7106.

॥ नीलकण्ठत्र्यक्षरीमन्त्रः ॥

NĪLAKAṆṬHATRYAKṢARĪMANTRAḤ

நீலகண்ட த்ரியக்ஷரீ மந்திரம்

Supplemental No. 458. Bundle No. 15. Burnell's No. 7108. Substance — Paper. Sheet—1. Script — Devanāgarī. No. of Granthas—17. Complete. Author—Nil.

Beginning:

श्रीगणेशाय नमः । श्रीनीलकण्ठत्र्यक्षरीमन्त्रः ॥

श्रीगुरुभ्यो नमः ॥ गुरवे सर्वलोकानां + नमः ॥

End:

इत्यभीष्टसंख्यया जप्त्वा पूर्ववदुत्तरन्यासादिपञ्चोपचारान्तं कुर्यात् ।

शुभमस्तु ॥

Colophon: Nil.

Subject:

ऋष्यादिन्यासध्यानोपेतः नीलकण्ठत्र्यक्षरीमन्त्रः ॥

Remarks:— The Ms. is in good condition.

॥ नीलकण्ठाष्टाक्षरमन्त्रः ॥

NĪLAKAṆṬHĀṢṬĀKṢARAMANTRAḤ

நீலகண்டாஷ்டாக்ஷரமந்திரம்

Supplemental No. 459. Bundle No. 15. Burnell's No. 7109.
Substance — Paper. Sheet — 1. Script—Devanāgarī.
No. of Granthas—16. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ नीलकण्ठाष्टाक्षरीमन्त्रः ॥ श्रीगुरुभ्यो नमः ॥
गुरवे सर्वलोकानां + नमः ॥

End :

इत्यभीष्टसंख्यया जप्त्वा पूर्ववत् उत्तरन्यासादिपञ्चोपचारान्तं कुर्यात् ॥ शुभमस्तु ॥

Colophon: Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः नीलकण्ठाष्टाक्षरमन्त्रः ॥

Remarks :— The Ms. is in good condition.

॥ अघोरमन्त्रः ॥

AGHORAMANTRAḤ

அகோரமந்திரம்

Supplemental No. 460. Bundle No. 15. Burnell's No. 7110.
Substance — Paper. Sheet — 1. Script — Devanāgarī.
No. of Granthas—20. Complete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ अघोरमन्त्रः ॥ श्रीगुरुभ्यो नमः ॥
गुरवे + नमः ॥

End :

पूर्ववदुत्तरन्यासादिपञ्चोपचारान् कुर्यात् ॥

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः अघोरमन्त्रः ॥

Remarks:—The Ms. is in good condition.

॥ लक्ष्मीनारायणमन्त्रः ॥

LAKṢMĪNĀRĀYAṆAMANTRAḤ

லக்ஷ்மீநாராயணமந்திரம்

Supplemental No. 461. Bundle No. 15. Burnell's No. 7111. Substance — Paper. Sheet — 1. Script — Devanāgarī. No. of Granthas—20. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ लक्ष्मीनारायणमन्त्रः ॥

श्रीगुरुभ्यो नमः ॥ गुरवे + नमः ॥

End :

इत्यभीष्टसंख्यया जप्त्वा पूर्ववत् उत्तरन्यासादिपञ्चोपचारान् कुर्यात् ॥ शुभमस्तु ॥

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः पञ्चप्रणवाद्यप्रणवाद्यः लक्ष्मीनारायण-पञ्चदशाक्षरमन्त्रः ॥

Remarks:— The Ms. is in good condition.

॥ आसनमन्त्रः (सुदर्शनषडक्षरजपविधिः) ॥

ĀSANAMANTRAḤ

ஆஸநமந்திரம்

Supplemental No. 462. Bundle No. 15. Burnell's No. 7112.

Substance—Paper. Sheets—1-13. Script—Devanāgarī. No. of Granthas—300. Incomplete. Author—Nil.

Beginning :

श्रीगुरुभ्यो नमः ॥

आसनमन्त्रस्य । पृथिव्या मेरुपृष्ठ ऋषिः । सुतलं छन्दः । श्रीकूर्मो देवता ॥

End :

मण्डलं लोकपालानां पर्यायेण त्रयस्त्रयः ।
परितं सन्ततोच्छिद्रं सिकतादि विकीर्य च ॥

Colophon : Nil.

Subject :

भूशुद्धि भूतशुद्धि प्राणप्रतिष्ठा मातृकान्यासैकादशविधाक्षरन्यासोपेतः सुदर्शनषडक्षरमन्त्रः ॥ गायत्रीलघुमालामहामालापुरस्सरः कवचाङ्गभूतः दिग्देवतादिमन्त्रकलापोपेतः दिग्बन्धनमन्त्रश्च ॥ तेनाभिमन्त्रितद्रव्यैः रक्षाविधिश्च ॥

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks.

॥ सभासंमेलनमन्त्रः (चित्तसंमेशमन्त्रः) ॥

SABHĀSAMMELANAMANTRAḤ

ஸபாஸம்மேளநமந்திரம்

Supplemental No. 463. Bundle No. 15. Burnell's No. 7118. Substance — Paper. Sheet—1. Script — Devanāgarī. No. of Granthas—12. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ सभासंमेळनमन्त्रः ॥ श्रीगुरुभ्यो नमः ॥
गुरवे + नमः ।

End :

पञ्चोपचारपूजां समर्प्य । मूलमन्त्रः ॥ ओन्नमः शिवाय श्रीं पशुहुंफट् ॥ शुभमस्तु ।

Colophon : Nil.

Subject :

शिवपञ्चाक्षरश्रीबीजपाशुपतास्त्रमन्त्रात्मकः ऋष्याद्युपेतः चित्सभा-

नटनमन्त्रः ॥

Remarks:— The Ms. is in good condition.

॥ दिग्बन्धनप्रयोगः ॥

DIGBANDHANAPRAYOGAḤ

திக்பந்தனபிரயோகம்

Supplemental No. 464. Bundle No. 15. Burnell's No. 7114. Substance—Paper. Sheets—1-22. Script—Devanâgarî. No. of Granthas—200. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ अथ दिग्बन्धनप्रयोगः । दिग्बन्धनमन्त्रस्य मरीचिपुत्रः कण्वः अहिर्बुध्न्य ऋषिः । अनुष्टुप् छन्दः । श्रीचक्रराज इन्द्रादिदिक्पाला देवताः ॥

End :

अयाते अग्ने समिधा विधेम प्रतिस्तोमँ शस्यमानं गृभाय । दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदोमित्रमहो अवद्यात् ॥

Colophon : Nil.

Subject:

लोकपालऋक्दुर्गाऋगाद्युपेतसुदर्शनमन्त्रैः सर्वशत्रुराजचोरग्रहादिभ्यो रक्षाकरः दिग्बन्धनाख्यः श्रीशिवाजिराजस्य शत्रुजयप्रदः सुदर्शन-दिग्बन्धनरक्षाप्रयोगः ॥ कृणुष्वपाजः इत्यनुवाकोपेतश्च ॥

Remarks:— The Ms. is in good condition.

॥ पञ्चगव्यप्राशनमन्त्रः ॥

PAÑCAGAVYAPRĀŚANAMANTRAḤ

பஞ்சகவ்யப்பிராசநமந்திரம்

Supplemental No. 465. Bundle No. 15. Burnell's No. 7115. Substance—Paper. Sheets—1+1 (=2.) Script—Devanāgarī. No. of Granthas—10. Complete. Author—Nil.

Beginning:

पञ्चगव्यप्राशनमन्त्रः ॥ अन्तश्शुद्ध्यै बहिश्शुद्ध्यै कुम्भयन्त्रअनुशुद्ध्ये च ।

End:

मसुन्दरो विराड्वक्त्रो द्विषासाहस्रबाहुराश्रितस्योद्दिष्टमिष्टं ददातु ॥

Colophon: Nil.

Subject:

पञ्चगव्यप्राशनमन्त्रः । आशीर्वादश्च ॥

Remarks:—The Ms. is in good condition.

॥ कृष्णषडक्षरमन्त्रः ॥

KṚṢṆAṢAḌAKṢARAMANTRAḤ

கிருஷ்ணஷடக்ஷரமந்திரம்

Supplemental No. 466. Bundle No. 15. Burnell's No. 7116. Substance—Paper. Sheets—2. Script—Devanāgarī. No. of Granthas—23. Complete. Author—Nil.

Beginning:

श्रीकृष्णाय नमः ॥ ओं ऐन्द्रादिदिक्षु बध्नामि नमश्चक्राय स्वाहा । अस्त्राय फट् । इति दिग्बन्धः ।

End:

श्रीकृष्णार्पणमस्तु ॥

Colophon: Nil.

Subject :

आसनमन्त्रः । भूतशुद्धिः । विष्णुमन्त्रस्य ऋष्यादिध्यानान्तभागश्च ॥
मन्त्रस्तु न विद्यते ॥

Remarks:—The Ms. is in good condition

॥ मन्त्राणां दशसंस्काराः ॥

MANTRASAṀSKĀRĀḤ

மந்திரங்களுக்கு 10 ஸம்ஸ்காரங்கள்

Supplemental No. 467. Bundle No. 15. Burnell's No. 7117.
Substance — Paper. Sheets—1-9. Script—Devanāgarī.
No. of Granthas—40. Complete. Author—Nil.

Beginning :

मन्त्राणां दश संस्काराः कथ्यन्ते सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥

End :

शुद्धं बिन्दुयुतं विसर्गसहितं हृल्लेखया श्रीयुतं
बालासंपुटितं तथैव परया श्रीविद्ययालंकृतम् ।
आरोहादवरोहतस्त्वजपया न्यासं पुनर्मालिनी
यो जानाति स एव सर्वजगतां सृष्टिस्थितिध्वंसकृत् ॥

Colophon : Nil.

Subject :

दशविधमन्त्रसंस्काराः । मूकादिदशविधमन्त्रदोषाः । शैवाष्ट-
त्रिंशत्कलाः । षडध्वन्यासनामानि । मातृकार्णदेवतावर्णफलानि ।
दशविधमातृकाप्रकारकथनं च ॥

Remarks:—The Ms. is in good condition.

॥ सर्वदेवतागायत्र्यः ॥

SARVADEVATĀGĀYATRYAḤ

ஸர்வதேவதாகாயத்ரிகள்

Supplemental No. 468. Bundle No. 15 Burnell's No. 7118. Substance—Paper. Sheets —1-7. Script — Devanāgarī. No. of Granthas—2?. Complete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ ओं नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो नारायणः प्रचोदयात् ॥ १

End:

ओं तत्सत् अद्य गायत्रीजप विष्णवे समर्पयेत् । इति चतुर्विंशतिगायत्री संपूर्णा ॥

Colophon: Nil.

Subject:

नारायणरामादिचतुर्विंशतिदेवतागायत्र्यः कराङ्गन्यासोपेताः ॥ प्रायेणात्र विद्यमाना गायत्र्यः अप्रसिद्धाः ॥

Remarks:— The Ms. is in good condition.

॥ नारायणावरणदेवताः ॥

NĀRĀYAṆĀVARAṆADEVATĀḤ

நாராயணாவரணதேவதைகள்

Supplemental No. 469. Bundle No. 15. Burnell's No. 7119. Substance — Paper. Sheet—1. Script — Telugu. No. of Granthas —10. Complete. Author —Nil.

Beginning:

अथ नारायणावरणम् ॥ अथ प्रथमावरणम् ॥ अग्नीशाननिर्ऋतिवायुकोणेषु ॥

End:

अं ब्रह्मणे । श्रीं अनन्ताय । इति पञ्चमावृतिः ॥ इति नारायणा-
वरणम् ॥

Colophon: Nil.

Subject:

नारायणपञ्चावरणदेवताः ॥

Remarks:—The Ms. is in good condition.

॥ गोपालावरणम् ॥

GOPĀLĀVARAṆAM

கோபாலஆவரணம்

Supplemental No. 470. Bundle No. 15. Burnell's No. 7120. Substance — Paper. Sheet—1. Script — Telugu. No. of Granthas—8. Complete. Author—Nil.

Beginning:

अथ गोपालत्रयोदशाक्षरी आवरणम् ॥ अथ प्रथमावरणम् ॥
अग्नीशानासुरवायुकोणेषु मध्ये च ॥

End:

इति तृतीयावृतिः ॥ इति गोपालत्रयोदशाक्षरी आवरणम् ॥

Colophon: Nil.

Subject:

गोपालत्रयोदशाक्षर्याः आवरणत्रितयदेवताः ॥

Remarks:—The Ms. is in good condition.

॥ लक्ष्मीमन्त्रः ॥

LAKṢMĪMANTRAḤ

லக்ஷ்மீமந்திரம்

Supplemental No. 471. Bundle No. 15. Burnell's No. 7121.

Substance — Paper. Sheet—1. Script — Telugu. No. of Granthas—16. Complete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ लक्ष्मीमन्त्रः ॥ श्रीगुरुभ्यो नमः ॥ गुरवे सर्वलोकानां + नमः ॥

End:

इत्यभीष्टसंख्यया जप्त्वा पूर्ववदुत्तरन्यासादिकं कुर्यात् ॥ शुभमस्तु ॥

Colophon: Nil.

Subject:

ऋष्यादिन्यासध्यानोपेतः लक्ष्मीएकाक्षरमन्त्रः ॥

Remarks:—The Ms. is in good condition.

॥ सूर्यत्र्यक्षरीमन्त्रः ॥

SŪRYATRYAKṢARĪMANTRAḤ

ஸூர்யத்ரியக்ஷரிமந்திரம்

Supplemental No. 472. Bundle No. 15. Burnell's No. 7122. Substance — Paper. Sheet—1. Script—Telugu. No. of Granthas—18. Complete. Author—Nil.

Beginning:

श्रीगणेशाय नमः । सूर्यत्र्यक्षरीमन्त्रः ॥ श्रीगुरुभ्यो नमः ॥ गुरवे + नमः ॥

End:

इत्यभीष्टसंख्यया जप्त्वा पूर्ववदुत्तरन्यासं कुर्यात् ॥ शुभमस्तु ॥

Colophon: Nil.

Subject:

ऋष्यादिन्यासध्यानोपेतः प्रणवाद्यः हंसमन्त्रोत्तरश्च सूर्यैकाक्षरमन्त्रः ॥

Remarks:—The Ms. is in good condition.

॥ स्वप्नवाराहीमन्त्रः ॥

SVAPNAVĀRĀHĪMANTRAḤ

ஸ்வப்நவாராஹீமந்திரம்

Supplemental No. 473. Bundle No. 15. O. S. R. No. 14877.
Substance—Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—4. Complete. Author—Nil.

Beginning :

श्रीस्वप्नवाराहीमन्त्रस्य । वामन ऋषिः । विराट् छन्दः । स्वप्न-वाराही देवता ॥

End :

ओं ह्रीं क्लौं स्वप्नवाराहि घोरे स्वप्नं ठठ स्वाहा ॥

Colophon : Nil.

Subject :

ऋष्याद्युपेतस्स्वप्नवाराहीमन्त्रः ॥

Remarks :— The Ms. is in decaying condition.

॥ भीष्मतर्पणश्लोकाः ॥

BHĪṢMATARPAṆAŚLOKĀḤ

பீஷ்மதர்பணச்லோகங்கள்

Supplemental No. 474. Bundle No. 15. O. S. R. No. 14878.
Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—9. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ भीष्मतर्पणम् ॥
वैय्याघ्रपादगोत्राय सांकृतिप्रवराय च ।
गंगापुत्राय भीष्माय प्रदास्येहं तिलोदकम् ॥

End :

कृष्णाङ्गारकचतुर्दश्यां कार्यं दीपोत्सवेत्वसंकार्यं । श्रावणकर्मा-

नन्तरमिदं कार्यं ॥ श्रीकृष्णार्पणमस्तु ॥

Colophon : Nil.

Subject :

भीष्मतर्पणश्लोकत्रयम् । यमचतुर्दशनामानि दशनामानि च । तर्पण-स्तुत्यर्थकानि च ॥

Remarks :— The Ms. is in decaying condition.

॥ चण्डिकामहोत्सवः ॥

CAṆḌIKĀMAHOTSAVAḤ

சண்டிகாமஹோத்ஸவம்

Supplemental No. 475. Bundle No. 15. O. S. R. No. 14879. Substance — Paper. Sheets— 2-10+22—45. (9+24=33.) Script — Devanāgarī. No. of Granthas—1000. Incomplete. Author—Nil.

Beginning :

...त्रेण प्रोक्षणीपात्रमध्यस्थां संस्रवां प्रश्य तीर्थान् ध्यायेत् । ततः प्रणीतापात्रोदकेन याश्शिवा याश्च शंयो याभिश्च सविता सह० ॥

End :

शिवस्यासनविन्याली पद्ममुद्रां प्रदर्शयेत् ।
करौ तु संहतौ कृत्वा सश्रुत्वातु ... ... ॥

Colophon :

इति डामरादितन्त्रसारे देवीमहोत्सवे होमविधिर्नाम अष्टमावसरः समाप्तः ॥

Subject :

शतचण्डीविधानं । सहस्रचण्डीविधानं । नवचण्डीविधानं । तत्र ब्राह्मणवरणं । बल्यादिक्रमः ॥ नानामातृकान्यासाः । पीठपूजा

आवरणपूजा च । मातृका तु मध्ये नष्टपत्रा ॥ अन्ते चात्र सुदर्शनन्यासध्यानात्मकं पत्रमेकं च भवति ॥

Remarks:—The Ms. is in decaying condition, and copied.

Supplemental No. 476—574.

Bundle No. 16.	O. S. R. No.	Sheet	विषयः
	14501	1	शरभशूलिनीयन्त्रं प्रत्यङ्गिरायन्त्रं च
	14502	,,	स्कन्द काम मृत्युञ्जय वरुण क्षेत्रपाल रति सूर्य गणेश सन्तानगोपालाख्य यन्त्रनवकम् ।
	14503	,,	पञ्चाक्षरस्तम्भनयन्त्रं
	14504	,,	पञ्चाक्षरवश्ययन्त्रं
	14505	,,	पञ्चाक्षरमारणयन्त्रं
	14506	,,	पञ्चाक्षरोच्चाटनयन्त्रं
	14507	,,	पञ्चाक्षराकर्षणयन्त्रं
	14508	,,	Do
	14509	,,	चक्रादिनानाबन्धाः (छन्दश्शास्त्रं)
	14510	,,	अङ्गारकयन्त्रं (रेखामात्रं)
	14511	,,	शरभयन्त्रं
	14512	,,	सिद्धारिचक्रं फलं च
	14513	,,	ऋणहराङ्गारकयन्त्रं
	14514	,,	रतिविद्यायन्त्रं
	14515	,,	कामयन्त्रं
	14516	,,	तिरस्करिणीयन्त्रं
	14517	,,	अघोरयन्त्रं

Bundle No. 16.	O. S. R. No.	Sheet	विषयः
	14518	1	मोहनचक्रप्रस्तारमात्रं
	14520(a)	,,	कार्तवीर्ययन्त्रं(रेखामात्रं)
	14520(b)	,,	दीपयन्त्रं (रेखामात्रं)
	14521	,,	भुवनेशीयन्त्रं (रेखामात्रं), वराहयन्त्रं, भुवनेशीयन्त्रान्तरं च
	14522	,,	दुष्टवश्यकरयन्त्रं राजमोहनयंत्रं च
	14523	,,	अघोरयन्त्रं(रेखामात्रं)
	14524	,,	अज्ञातं यन्त्रं (रेखामात्रं)
	14525	,,	कार्तवीर्ययंत्रं अग्निकार्तवीर्ययन्त्रं च
	14526	,,	कार्तवीर्ययन्त्रान्तरं आवरणोपेतं
	14527	,,	नारायणचक्रं पिण्डचक्रं च
	14528	,,	इन्द्राक्षीयन्त्रं (रेखामात्रं)प्रस्तारोपेतं च
	14529	,,	योगिनीचित्रं
	14530	,,	गणपतियन्त्रं(रेखामात्रं)
	14531	,,	कार्तवीर्ययन्त्रं(धारणार्थकं)
	14532	,,	वारुणयन्त्रं हनुमद्यन्त्रं च
	14533	,,	गणपतियन्त्रं
	14534	,,	नवग्रहचक्रं
	14535	,,	चिदंबरपूजायन्त्रं वायुचक्रं च
	14536	,,	सूर्ययन्त्रं(रेखामात्रं)प्रस्तारोपेतं च
	14537	,,	सूर्ययन्त्रान्तरं आपदुद्धारणयन्त्रं च
	14538	,,	शरभयन्त्रं कामयन्त्रं वन्ध्यादोषहरं यन्त्र-द्वयं च

Bundle No. 16.	O. S. R. No.	Sheet	विषयः
	14539	1	षण्मुख, भैरव, लक्ष्मी, उमानाथ, पार्वती-सूर्य, ध्यानानि ॥
	14540	,,	रामयन्त्रं पात्रसादन पूजाक्रम मुद्रालक्षणानि
	14541	,,	सन्तानगोपालयन्त्रं सदाशिवयन्त्रं च
	14542	,,	इन्द्राणीयन्त्रं धन्वन्तरियन्त्रं च
	14543	,,	नृसिंह्मयन्त्रं
	14544	,,	हनुमद्यन्त्रं
	14545	,,	सुदर्शनयन्त्रं (रेखामात्रं) सप्रस्तारं
	14546	,,	नवग्रहसंख्यायन्त्रं
	14547	,,	श्रीचक्रं (असंपूर्णं)
	14548	,,	उमामहेशयन्त्रं
	14549	,,	स्वयंवराचित्रं
	14550	,,	योगभयंकरीचित्रं
	14551	4	योगिनी, योगेश्वरी, योगभयंकरी, स्वयंवराचित्राणि [असंपूर्णानि]
	14552	1	हनुमद्यन्त्रं
	14553	,,	नृसिंह्मयन्त्रं
	14554	,,	श्रीचक्रं [रेखामात्रं]
	14555	,,	सुब्रह्मण्यनवखण्डयन्त्रं [रेखामात्रं]
	14556	,,	इन्द्रयन्त्रं अजपायन्त्रं च
	14557	,,	सुदर्शनयन्त्रं वाग्वादिनीयन्त्रं च
	14558	,,	स्वयंवरायन्त्रं हरिहरयन्त्रं च
	14559	,,	सीतारामयन्त्रं रेणुकायन्त्रं च

Bundle No. 16	O. S. R. No.	Sheet	विषयः
	14560	1	सुब्रह्मण्यनवखण्डयन्त्रं
	14561	,,	सीतारामकवचयन्त्रं
	14562	,,	योगेश्वरीचित्रं
	14563	,,	मृत्युंजययन्त्रं
	14564	,,	मृत्युंजययन्त्रं यन्त्रान्तरं च
	14565	,,	गजलक्ष्मीयन्त्रं साक्षरं महालक्ष्मीयन्त्रं (रेखामात्रं च)
	14566	,,	हनूमद्यन्त्रं
	14567	,,	बार्हस्पत्यपुत्रकामेष्टिकर्मणि ऋत्विजां स्थानप्रदर्शकं चक्रम्
	14568	3	शरभयंत्रद्वयं यन्त्रत्रयप्रस्तारोपेतं च
	14569	1	शरभयन्त्रं सप्रस्तारं
	14570	,,	कार्तवीर्ययन्त्रं (रेखामात्रं)
	14571	,,	मृत्युंजययन्त्रं
	14572	,,	नृसिंहयन्त्रं
	14573	,,	नारायणयन्त्रं
	14574	,,	मन्युयन्त्रं
	14575	,,	कूर्मचक्रं (रेखामात्रं)
	14576	,,	वैष्णवपीठचक्रं
	14577	6	पञ्चाक्षरषट्कर्मप्रयोगचक्रषट्कं
	14580	1	सिद्धारिचक्रं
	14581	,,	आकर्षणयन्त्रपूजादिक्रमः

Bundle No. 16.	O. S. R. No.	Sheet	विषयः
	14583	1	रक्षायन्त्रं
	14585	,,	उच्चाटनप्रयोगक्रमः
	14586	,,	कार्तवीर्यानुष्टुभमन्त्रः
	14587	,,	कार्तवीर्यानुष्टुभमन्त्रान्तरं
	14588	,,	कार्तवीर्यार्जुनानुष्टुभमन्त्रः (पाशमायांकुशबीजसुदर्शनषडक्षरोपेतः)
	14589	,,	चोरस्तंभनकरः 17 अक्षरकार्तवीर्यमन्त्रः
	14590	,,	चोरस्तंभनकरः 24 अक्षरकार्तवीर्यमन्त्रः
	14591	2	कार्तवीर्यमालामन्त्रः
	14592	1	कार्तवीर्ययन्त्रं
	14593	,,	(आकर्षणमारण)पञ्चाक्षरयन्त्रपूजा-प्रयोगक्रमः
	14594	,,	श्रीचक्रप्रस्तारः
	14595	2	नवग्रहसंख्यायन्त्रद्वयं
	14596	1	कार्तवीर्ययन्त्रं (रेखामात्रं)
	14598	,,	सूर्यचक्रप्रस्तारः
	14599	,,	मृत्युञ्जययन्त्रप्रस्तारः
	2	,,	रेखात्मकं चक्रं
	3	,,	सूर्ययन्त्रं (रेखामात्रं)
	4	,,	बिन्दूपेतं खण्डात्मकं यन्त्रं सचित्रं च
	5	,,	राशिचक्रं
	No. Less.	,,	यन्त्राङ्ककथनं
	,,	,,	हनूमन्माला केचन श्लोकाश्च

Remarks:—No.14501—14599, 2-5, No. Less 2=(99 Mss.) These Mss. are not in good condition. These Mss. are in Devanāgarī Script (6 Mss. are not found).

॥ सकलदेवतामन्त्राः

SAKALADEVATĀMANTRAḤ

ஸகலதேவதாமந்திரங்கள்

Supplemental No. 575. Bundle No. 17. Burnell's No. 7123. Substance—Paper. Sheets—1-37. Script—Devanāgarī. No. of Granthas—400. Complete. Author—Nil.

Beginning :

सालग्राममन्त्रः ॥

ओं नमो भगवते विष्णवे श्रीसालग्रामनिवासिने सर्वाभीष्टफल-प्रदाय सकलदुरितनिवारिणे सालग्रामाय स्वाहा ॥

End :

पवमानदेवताकः ॥ यदन्ति यच्च दूरके भयं विन्दति मामिह । पवमानवितज्जहि ॥ उपद्रवनिवृत्तिकरमन्त्रः ॥

Colophon : Nil.

Subject :

प्रपञ्चसारसारसंग्रहे प्रदर्शितानां सर्वेषामपि मन्त्राणां स्वरूपमात्रप्रदर्शकं गुच्छमिदम् ॥ न चात्र ऋष्यादिन्यासाः ध्यानानि वा दृश्यन्ते ॥

Remarks:—The Ms. is in good condition.

॥ कल्पसारसमुच्चयः ॥

KALPASĀRASAMUCCAYAḤ

கல்பஸாரஸமுச்சயம்

Supplemental No. 576. Bundle No. 17. Burnell's No. 7124. Substance — Paper. Sheets—1-5+1(=6) Script—Devanāgarī. No. of Granthas—70. Complete. Author—Nil.

Beginning :

सुदर्शनस्य मन्त्रस्य कल्पसारसमुच्चये ।
वशीकरविधिं(धिः) नाम द्वाविंशोऽध्याय उच्यते ॥

End:

इत्येवमुक्ता विधायो वाचस्पतिरिति श्रुतिः । ?
वशीकरविधेरूर्ध्वं यक्षिसाध्यो विधीयते ॥ ?

Colophon:

इति कल्पसारसमुच्चये द्वाविंशोऽध्यायः ॥

Subject :

कल्पसारसमुच्चये सुदर्शनवश्यप्रयोगाः ॥ अन्ते चास्य सूचीपत्रमात्रं विभिन्नम् ॥

Remarks:—The Ms. is in good condition and copied.

॥ सुदर्शनमन्त्रः ॥

SUDARŚANAMANTRAḤ

ஸுதர்சனமந்திரம்

Supplemental No. 577. Bundle No. 17. Burnell's No. 7125. Substance—Paper. Sheets—1-5. Script—Devanāgarī. No. of Granthas—7). Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ श्रीहेतीश्वराय नमः ॥
वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

End :

कोटिसूर्यप्रकाशाय कुङ्कुमारुणवक्षसे ।
स्फुरद्धेतिसहस्राय सहस्राराय मङ्गळम् ॥

Colophon : Nil.

Subject:

ऋष्यादिन्यासाक्षरन्यासध्यानशापमोचनोपेतः श्रीमायाबीजाद्यः सुदर्शनषडक्षरमन्त्रः । त्रिचत्वारिंशदक्षरः मालामन्त्रः । मन्त्राक्षरस्तोत्रं च ॥

Remarks:—The Ms. is in good condition.

॥ सर्वमन्त्रसङ्ग्रहः ॥

SARVAMANTRASAṄGRAHAH

ஸர்வமந்திர ஸங்கிரஹம்

Supplemental No. 578. Bundle No. 17., Burnell's No. 7126.(a) Substance — Paper. Sheets—1- 329. (71-100 missing. =299.) Script-Devanāgarī. No. of Granthas-3000. Incomplete. (यावदुपलब्धि संपूर्ण) Author—Nil.

Beginning:

मातृकामन्त्रः ॥

ब्रह्मा ऋषिः । गायत्री छन्दः । मातृकासरस्वती देवता ॥

End:

ये द्रुह्यान् जपेन्मह्यं अग्ने कदायियो दुर्मदा अश्मदासः ।
आविद्ध्यैतान्रोचिषा विद्धि तन्तून्वैवस्वतस्य सदनं यमस्य ॥
इति नवमवर्गः ॥

Colophon : Nil.

Subject:

ऋष्यादिन्यासध्यानोपेताः प्रपञ्चसारसारसङ्ग्रहप्रोक्ता मन्त्राः ॥
गणपतिमन्त्रप्रतिपादकानि (७१–१००) ३० पत्राणि न सन्ति ॥

Remarks:— The Ms. is in good condition.

|| सर्वमन्त्रध्यानसङ्ग्रहः ||

SARVAMANTRADHYĀNASAṄGRAHAḤ

ஸர்வமந்திரத்யான ஸங்கிரஹம்

Supplemental No. 579. Bundle No. 17. Burnell's No. 7126.(b)
Substance—Paper. Sheets—1—80. Script— Devanāgarī.
No. of Granthas— 800. Complete. Author—Nil.

Beginning:

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देहां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुंभचिह्नां लिखितवरकरां त्रीक्षणां पद्मसंस्थां
अच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

End:

खङ्गचर्मधरा कृष्णा मुक्तकेशी दिगम्बरा ।
सन्दंष्ट्रा सर्वभूषाढ्या ध्येया सर्वारिभक्षणा ॥

Colophon : Nil.

Subject:

प्रपञ्चसारसारसङ्ग्रहोक्तानां मातृकासरस्वत्यादिप्रत्यङ्गिरान्तानां मन्त्राणां ध्यानसङ्ग्रहः ॥

Remarks:—The Ms. is in good condition.

|| आकाशभैरवकल्पमन्त्रसङ्ग्रहः ||

ĀKĀŚABHAIRAVAKALPAMANTRASAṄGRAHAḤ

ஆகாசபைரவகல்பமந்திரஸங்கிரஹம்

Supplemental No. 580. Bundle No. 17. Burnell's No. 7126(c)
Substance — Paper. Sheets—1-29. Script—Devanāgarī.
No. of Granthas—250. Complete. Author—nil.

यावदुपलब्धि समग्रम् ।

Beginning :

आकाशभैरवकल्पोक्ताकाशभैरवमालामन्त्रः ॥ आनन्दभैरव ऋषिः ।
गायत्री छन्दः । आकाशभैरवो देवता ॥

End :

शीघ्रसिद्धिप्रदः सौभाग्यप्रदश्चायं मन्त्रः ॥

Colophon : Nil.

Subject :

आकाशभैरवसाळुवेशाशुगरुडमालामन्त्राः । भैरवसिद्धभैरवश्मशानरुद्र-
कालाग्नियाज्ञोपसंहाराग्नीन्द्रनिर्ऋतिवायुसोमेशानसरस्वतीभद्रकाळी-
द्राविणीशब्दाकर्षिणीमायाव्याहृतिमन्त्राः ॥ त्वरितावीरभद्र-
महाभैरववडवानलभैरववरुणमन्त्राणां ऋष्यादिध्यानान्तभागश्च ॥
आकाशभैरवमाला तु 1, 28, 29, पत्रेषु विद्यमाना बोध्या ॥

Remarks:— The Ms. is in good condition.

॥ ध्यानसंग्रहः ॥

DHYĀNASAṄGRAHAḤ

த்யாநஸங்கிரஹம்

Supplemental No. 581. Bundle No. 17. Burnell's No. 7126. (d) Substance—Paper. Sheets—32-44(=13). Script—Devanāgarī. No. of Granthas—100. Author—Nil.

Beginning :

धारणासरस्वतीध्यानम् ॥

सुरासुरासेवितपादपङ्कजा करे विराजत्कमनीयपुस्तका ।
विरिञ्चिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे सादा ॥

End :

कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासितं
मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं जारिणी । ?

सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं

पश्यन्तं मुकुटाङ्गदादिविविधाकल्पोज्वलाङ्गं भजे ॥

Colophon: Nil.

Subject:

सरस्वती नकुली परा बाला चिन्तामणिसरस्वती धारणासरस्वती राज-
लघुमातङ्गी विद्यागोपाल रामध्यानानि । विद्यागोपालरामसरस्वती-
मन्त्राः । 20 ऋचां प्रतीकाश्च ॥

Remarks:—The Ms. is in good condition.

॥ शैवाष्टत्रिंशत्कलान्यासः ॥

ŚAIVĀṢṬATRIMŚATKALĀNYĀSAḤ

சைவாஷ்டத்ரிம்சத்கலாந்யாஸம்

Supplemental No. 532. Bundle No. 17. No. Less. 1. Substance — Paper. Sheets— 1-4. Script—Devanāgarī. No. of Granthas—27. Complete. Author—Nil.

Beginning:

श्रीसांबशिवाय नमः ॥

अष्टत्रिंशत्कलान्यासन्यस्तदेहस्य भामिनी ।

मन्त्राः सिध्यन्ति सहसा मत्प्रसादश्च जायते ॥

End:

इयममृतेश्वरीभावना । अनया भावनया चिरजीविता ज्वरवेग-
शान्तिः विषशान्तिश्च भवति ॥ श्रीशिव ॥

Colophon: Nil.

Subject:

शैवाष्टत्रिंशत्कलान्यासः ॥ अमृतेश्वरीभावना च ॥

Remarks:—The Ms. is in good condition.

॥ भूतलिपयः ॥

BHŪTALIPAYAḤ

பூதலிபிகள்

Supplemental No. 583. Bundle No. 17. No. Less 2.
Substance—Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—5. Complete. Author—Nil.

Beginning :

अथ भूतपरीक्षा ॥ अ इ उ ऋ ऌ इति पञ्चवर्णाः क्रमेण वाय्वग्नि-
भूमिजलखमयाः ॥

End :

आकाश ॥ ऌ ॡ अं ङ ञ ण न म श ह ... ... ॥

Colophon : Nil.

Subject :

पञ्चभूतात्मकानामकारादिक्षकारान्तानामक्षराणां विवेचनं ॥

Remarks :— The Ms. is in good condition.

॥ इन्द्राक्षीस्तोत्रम् ॥

INDRĀKṢĪSTOTRAM

இந்திராக்ஷீஸ்தோத்ரம்

Supplemental No. 584. Bundle No. 17. No. Less. 3.
Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—13. Complete. Author.—Nil.

Beginning :

श्रीदेव्यै नमः ॥ इन्द्र उवाच ॥

इन्द्राक्षी नाम सा देवी दैवतैस्समुदाहृता ।
गौरी शाकंभरी देवी दुर्गानाम्नीति विश्रुता ॥

End :

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।

शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ॥

Colophon :

इति श्रीइन्द्राक्षीस्तोत्रं संपूर्णम् ॥ श्रीशिवार्पणमस्तु ॥

Subject :

इन्द्राक्षीनामकदेवीस्तुतिः ॥

Remarks :—The Ms. is in decaying condition.

॥ धानुष्कश्रमाभ्यासः ॥

DHĀNUṢKAŚRAMĀBHYĀSAḤ

தாநுஷ்கச்ரமாப்பியாஸம் (வில் பயிர்ச்சி)

Supplemental No. 585. Bundle No. 17. No. Less. 4.
Substance—Paper. Sheets—3-14(=12) Script-Devanāgarī.
No. of Granthas—135. Incomplete.

Author—पार्वत्यै शिवोपदिष्टे आकाशभैरवतन्त्रे ।

Beginning :

... ... पुणास्त्रेतायां रघुनन्दनः ।

द्वापराख्ये युगे द्रोणः देवचापे वरानने ॥

End :

इत्येतत्ते समाख्यातं श्रमकर्म यथाक्रमम् ।

सङ्ग्रहेण सरोजाक्षि किमन्यच्छ्रोतुमिच्छसि ॥

Colophon :

इत्याकाशभैरवाख्ये महाशैवतन्त्रे सांराज्यलक्ष्मीपीठिकायां धानुष्कश्रमाभ्यासस्वरूपनिरूपणं नाम एकोनविंशतितमः पटलः ॥

Subject:

साम्राज्यलक्ष्मीपीठिकोक्तधानुष्कश्रमाभ्यासे 14 श्लोकमारभ्य 116 पटलः 119 पटलश्च ॥

Remarks:—The Ms. is in good condition wants 1—13 verses in 116th Patala.

॥ चामुण्डीमन्त्रः ॥

CĀMUṆḌĪMANTRAḤ

சாமுண்டீமந்திரம்

Supplemental No. 536. Bundle No. 17. No. Less. 4. Substance — Paper. Sheets — 2. Script — Devanāgarī. No. of Granthas—15. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ ओं अस्य श्रीमहालक्ष्मीनवाक्षरमन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ॥

End :

त्रिशूलधारिणीमंबां सर्वसौभाग्यदायिनीम् ।
सर्वशृंगारवेषाढ्यां देवीं ध्यात्वा रिपुं जयेत् ॥
मनुः— ओं ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा ॥

Colophon : Nil.

Subject :

ऋष्यादिन्यासध्यानोपेतः प्रणववाणीमायाकामबीजोपेतश्च चामुण्डा-नवाक्षरीमन्त्रः ॥

The Ms. is in decaying condition.

॥ चामुण्डाद्वादशाक्षरीमन्त्रः ॥

CĀMUṆḌĀDVĀDAŚĀKṢARĪMANTRAḤ

சாமுண்டாத்வாதசாக்ஷரீமந்திரம்.

Supplemental No. 587. Bundle No. 17. No. Less 5. Substance—Paper. Sheets — 2. No. of Granthas— 15. Complete.

Subject :— चामुण्डाद्वादशाक्षरीमन्त्रः न्यासाद्युपेतः ॥

Remarks :—Not so bad.

॥ दक्षिणकालीकवचम् ॥

DAKṢIṆAKĀLĪKAVACAM

தக்ஷிணகாளீ கவசம்

Supplemental No. 588. Bundle No. 17. No. Less. 6.
Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—10. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ अस्य श्रीदक्षिणकालीकवचस्तोत्रमन्त्रस्य ।
भैरव ऋषिः । अनुष्टुप् छन्दः ॥

End :

पर्वते वा गृहे वापि कवचं मन्मुखोदितम् ।
सर्वकार्यार्थसिद्धिस्स्यान्नात्र कार्या विचारणा ॥

Colophon :

इति श्रीकाळितन्त्रे दक्षिणकालिकाकवचं संपूर्णं ॥
श्रीमज्जगदंबिकायै नमः ॥

Subject :

ऋषिच्छन्दोभ्यामुपेतं दक्षिणकालीकवचम् ॥

Remarks :— The Ms. is in good condition.

॥ शुद्धपञ्चाक्षरमन्त्रः ॥

ŚUDDHAPAÑCĀKṢARAMANTRAḤ

சுத்தபஞ்சாக்ஷரமந்திரம்

Supplemental No. 589. Bundle No. 17. No. Less. 7.
Sheet—1. No. of Granthas—8.

Subject :— शुद्धपञ्चाक्षरमन्त्रस्य ऋष्यादिध्यानान्तम् ॥

Remarks:—The Ms. is in good condition.

॥ पञ्चदेवतागायत्री ॥

PAÑCADEVATĀGĀYATRĪ

பஞ்சதேவதாகாயத்திரீ

Supplemental No. 590. Bundle No. 17. No. Less. 8.
Substance — Paper. Sheet—1. Script — Devanāgarī.
No. of Granthas—5. Complete. Author—Nil.

Beginning :

ओं तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

End :

ओं वक्रतुण्डाय विद्महे लंबोदराय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ इति गणेशगायत्री ॥

Colophon : Nil.

Subject :

रुद्रसूर्यसरस्वतीनारायणगणेशगायत्र्यः ॥

Remarks :—The Ms. is in decaying condition.

॥ कल्पसारसमुच्चये तृतीयोऽध्यायः ॥

KALPASĀRASAMUCCAYAḤ

கல்பஸாரஸமுச்சயம் மூன்றும் அத்தியாயம்

Supplemental No. 591. Bundle No. 17. No. Less. 9.
Substance — Paper. Sheets—1-3. Script — Devanāgarī.
No. of Granthas—20. Complete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

सुदर्शनस्य मन्त्रस्य कल्पसारसमुच्चये ।
ऋष्याद्यङ्गविधिर्नाम तृतीयोऽध्याय उच्यते ॥

End :

इत्येवं भगवान् गार्ग्यो मन्त्रस्याङ्गानि चोक्तवान् ।
पुनरेवाङ्गमन्त्रस्य स्वयमेवोक्तवान्मुनिः ॥

Colophon :

इति कल्पसारसमुच्चये ऋष्याद्यङ्गविधिर्नाम तृतीयोऽध्यायः ॥

Subject :

सुदर्शनषडक्षरस्य प्रत्यक्षरं समष्ट्या च ऋष्याद्यंगदेवतादिकथनम् ॥

Remarks :—The Ms. is in good condition.

॥ रत्नदीपिका ॥

RATNADĪPIKĀ

ரத்நதீபிகை

Supplemental No. 592. Bundle No. 17. No. Less. 11. Substance—Paper. Sheets—1—6+9-14(=12) sheets 7, 8 Not found. Script—Devanāgarī. No. of Granthas—150. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

हुं शक्तिः । ब्रह्म बीजमित्यादि ॥ आचक्राय स्वाहा ।

End :

इत्युक्त्वा मुनयस्सर्वे नारदेन महात्मना ।
द्वयाधिकारिणस्सर्वे यान्ति विष्णोः परं पदम् ॥

Colophon :

इति रत्नदीपिकायां द्वितीयोऽध्यायः ॥

Subject:

१—६ पत्रेषु सुदर्शनैकाक्षरषडक्षरषोडशाक्षरादिमन्त्राः सुदर्शनमाला सहस्राक्षरमाला च ॥ ९—१४ पत्रेषु तप्तमुद्रांकनविष्णुलक्ष्मी-मन्त्रोपदेशपुरस्सरं वैष्णवत्वापादनक्रमबोधकौ रत्नदीपिकाख्यस्य ग्रन्थस्य प्रथमद्वितीयाध्यायौ च ॥ ग्रन्थेस्मिन्सर्वत्राक्षरादिपातो दृश्यते ॥

Remarks:—The Ms. is in good condition.

॥ मन्त्रदीपिका ॥

MANTRADĪPIKĀ

மந்திரதீபிகை

Supplemental No. 593. Bundle No. 17. No. Less. 12.
Substance — Paper. Sheets— 1–34. Script—Devanāgarī.
No. of Granthas—450. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

अथातस्संप्रवक्ष्यामि ऋष्याद्यङ्गविधिक्रमम् ।
अहिर्बुध्न्यो नाम ऋषिः गायत्री छन्द उच्यते ॥

End :

धनुष्पाशे श्यामवर्णे... ... ... ॥

Colophon :

इति सुदर्शनाष्टायुधव ... ... ध्यानसमाप्तम् ॥
हरिः ओं ॥ शुभमस्तु ॥

Subject :

नानाफलदायकसुदर्शनमन्त्रप्रयोगक्रमबोधकाः तृतीयाध्यायाद्येकादशा-ध्यायान्ताः नव अध्यायाः ॥ बहुत्र ग्रन्थपातो दृश्यते ॥

Remarks :— The Ms. is in good condition.

॥ कल्पसारसमुच्चयः ॥

KALPASĀRASAMUCCAYAḤ

கல்பஸாரஸமுச்சயம்

Supplemental No. 594. Bundle No. 17. No. Less. 13. Substance—Paper. Sheets—76. (Each Adhyaya contains separate sheet) Script-Devanāgarī. No. of Granthas-600. Incomplete. Author—Nil.

Beginning :

श्रीगणेशाय नमः ॥

दो दीप्तिव्याप्तान्तरिक्षं कलसदृरुण विभाभासिताकान्तरालं
दंष्ट्राबिभ्रितवह्निद्युतिगणपरि ... ... वेष्टातिरिक्तं ननाम् ।
चक्रं शंखासिचापांबुजमुसलगदाश्लिष्टपाशांकुकै ?
दोर्भिः पिंगाक्षकेशं प्रणमत शिरसा विष्णुचक्राभिधानम् ॥

End :

दक्षिणा दक्षिणेत्युक्तं मूल्यानि धनमेव च ।
उभयं शक्तितो दद्यात् मन्त्रस्य गुरुदक्षिणा ॥

Colophon :

इति कल्पसारसमुच्चये विष्णुलोकविधिर्नाम चतुर्विंशोध्यायः ॥ २४ ॥

Subject :

24 अध्यायात्मकेऽस्मिन्ग्रन्थे 2, 3, 9, 22, संख्याकाः अध्याया न विद्यन्ते ॥ 4, 6, 18, अध्यायेषु पत्राणि नष्टानि ॥ ग्रन्थेऽस्मिन्सुदर्शनमन्त्राः तदङ्गदेवतामन्त्राश्च भवन्ति । समग्रोऽयं ग्रन्थः सुदर्शनमन्त्रप्रयोगक्रमानेव बोधयति ॥ अन्ते चास्य अनुक्रमणिका विद्यते ॥

Remarks:—The Ms. is in decaying condition, and copied.

॥ कल्पसारसमुच्चयः ॥

KALPASĀRASAMUCCAYAḤ

கல்பஸாரஸமுச்சயம்

Supplemental No. 595. Bundle No. 17. No. Less. 15. Sheets—2. No of Granthas—12-29 (=18)

Subject :

कल्पसारसमुच्चये 16 अध्यायस्य भागः ॥

Remarks :—The Ms. is in good condition.

॥ देवीमाहात्म्यम् ॥

DEVĪMĀHĀTMYAM

தேவீமாஹாத்ம்யம்

Supplemental No. 596. Bundle No. 17. No. Less 16. Sheets—2. No. of Granthas—14.

Subject :

देवीमाहात्म्यान्तर्गतः शक्रादिस्तुतिभागः ॥

Remarks:— The Ms. is in good condition.

॥ षोडशकलान्यासः ॥

ṢOḌAŚAKALĀNYĀSAḤ

ஷோடசகலாந்யாஸம்

Supplemental No. 597 & 598. Bundle No. 17. No. Less 17, 18. (2 Mss.) Sheet—Each 1. No. of Granthas—8.

Subject :

षोडशकलान्यासः समग्रः ।

Remarks:— The Ms. is in good condition. The Ms. is as in Ms. No. 6818.

॥ श्रीबीजमातृकान्यासः ॥

ŚRĪBĪJAMĀTṚKĀNYĀSAḤ

ஶ்ரீபீஜமாத்ருகாந்யாஸம்

Supplemental No. 599. Bundle No. 17. No. Less. 19.
Sheets—2. No of Granthas—35.

Subject :

श्रीबीजमातृकान्यासः ॥

Remarks:—The Ms. is in good condition.

॥ बिन्दुयुक्तमातृकान्यासः ॥

BINDUYUKTAMĀTṚKĀNYĀSAḤ

பிந்துயுக்தமாத்ருகாந்யாஸம்

Supplemental No. 600. Bundle No. 17. No. Less. 20.
Sheets—2. No. of Granthas—25.

Subject :

बिन्दुयुक्तमातृकान्यासः ॥

Remarks:—The Ms. is in good condition.

॥ विसर्गयुक्तमातृकान्यासः ॥

VISARGAYUKTAMĀTṚKĀNYĀSAḤ

விஸர்கயுக்தமாத்ருகாந்யாஸம்

Supplemental No. 601. Bundle No. 17. No. Less. 21.
Sheets—2. No. of Granthas—25.

Subject :

विसर्गयुक्तमातृकान्यासः ॥

Remarks:—The Ms. is in good condition.

॥ बिन्दुविसर्गयुक्तमातृकान्यासः ॥

BINDUVISARGAYUKTAMĀTṚKĀNYĀSAḤ

பிந்துவிஸர்கயுக்தமாத்ருகாந்யாஸம்

Supplemental No. 602 & 603. Bundle No. 17. No, Less, 22. 23. (2, Mss.) Sheet—Each 1. No, of Granthas—25.

Subject :

बिन्दुविसर्गयुक्तमातृकान्यासः ॥

Remarks:—The 2 Mss. are in good condition.

॥ महाषोढान्यासः ॥

MAHĀṢOḌHĀNYĀSAḤ

மஹாஷோடாந்யாஸம்

Supplemental No. 604. Bundle No, 17. No, Less. 24. Sheets—7. No. of Granthas—200.

Subject :

महाषोढान्यासः ॥

Remārks:— The Ms. is in good condition.

॥ शैवभूतशुद्धिक्रमः ॥

ŚAIVABHŪTAŚUDDHIKRAMAḤ

சைவபூதசுத்திக்கிரமம்

Supplemental No. 605. Bundle No. 17. No. Less 25. Substance—Paper. Sheets—1 14. (Sheets 1 & 4 not found) Script — Devanāgarī. No. of Granthas—275. Incomplete. Author—Nil.

Beginning :

एवं चतुर्विधैर्वाद्यैस्स्वस्तिमंगलवाचकैः ।

ध्वजछात्रिचामरव्यजनतालवृन्दैस्समं आलयं प्रविश्य

End :

चिन्तामणिपीठे पद्मासनाभ्यर्च्य ओं कन्दाय नमः । ओं बीजाय नमः । ओं अंकुराय नमः ॥

Colophon : Nil.

Subject :

शैवभूतशुद्धिक्रमः । न्यासाः । द्वारपूजा । पूजाक्रमः । पीठपूजा । आवरणपूजा च ॥

Remarks :—The Ms. is in good condition Sheets Nos. 1 & 4. are missing.

॥ लक्ष्मीमन्त्रादयः ॥

LAKṢMĪMANTRĀDAYAḤ

லக்ஷ்மீமந்திரம் முதலியவை

Supplemental No. 606. Bundle No. 17. No. Less 26. Substance—Paper. Sheets—2-4=(3) Script—Devanāgarī. No. of Granthas—75. Incomplete. Author—Nil.

Beginning :

... ... समान्वितम् ।
बिन्दुनादात्मकं बीजं लक्ष्मीमन्त्र उदाहृतः ॥
ऋषिर्भृगुर्निचृच्छन्दस्तथा श्रीर्देवता प्रिये ।

End :

आकर्षणं वशीकारो मारणोच्चाटनादिकम् ।
स्तम्भनं मोहनं चै ... ... ॥

Colophon: Nil

Subject :

ऋष्याद्युपेतः लक्ष्मीमन्त्रः आवाहनादिमुद्राश्च, २– पत्रे, चामुण्डीमन्त्रप्रयोगाः ३, ४–पत्रयोश्च भवन्ति। पत्राणि आद्यन्तहीनानि ।

Remarks:— The Ms. is in good condition. No. 2nd sheet is different.

॥ महाराष्ट्रमन्त्रः ॥

MAHĀRĀṢṬRAMANTRAḤ

மஹாராஷ்டிரமந்திரம்

Supplemental No. 607. Bundle No. 17. No. Less 27. Substance — Paper. Sheets— 2. Script — Devanāgarī. No. of Granthas—30. Incomplete. Author—Nil.

Beginning:

श्रीगणेशाय नमः ॥ वशीकरणमन्त्रः ॥ काजल मृतजल्क मृत-भ्रमर मृतमात्सळ समभागे० ॥

End:

ओं नमो आगिया वेताळ पेस पाताळ सवामणवरि अरिमुखे मेहळु ।

Colophon: Nil.

Subject:

वश्यप्रद्प्रयोगः । चिदंबरमोहरापरीक्षा च ॥ रत्नपरीक्षा रत्नफलं च ॥ हिन्दीमहाराष्ट्रभाषासंकुलो ग्रन्थः असमाप्तश्च ॥ अनुपयुक्तानि पत्राणि च भवन्ति ॥

Remarks:—The Ms. is in good condition.

॥ साहित्यमञ्जूषाभागः ॥

SĀHITYAMAÑJŪṢĀBHĀGAḤ

ஸாஹித்யமஞ்ஜூஷாபாகம்

Supplemental No. 608. Bundle No. 18. Burnell's No. 7127. Substance — Paper. Sheets — 3. Script — Devanāgarī. No. of Granthas—35. Incomplete. Author—द्वाजिः ।

Beginning:

श्रीगणेशाय नमः ॥

अथ कवेराश्रयकथनम्

श्रीमान्कौशिकगोत्रजश्च सुयशा जित्वा भवान्या वरा
दाप्रालेयनगात्त्रिसागरतटान्तं चक्रवालं भुवः ।
दध्रे यो यवनद्विपेषु हरितां राजन्यवंशाग्रणी-
रासीच्छत्रपतिस्स्वयाचकचयस्वद्रुश्शिवाजिर्नृपः ॥

End:

नरसिंह्मः कुलदैवतमाराध्य इभाननो महालक्ष्मीः ।
करवीरस्था त्रिजगज्जननी तृप्यत्वनेन काव्येन ॥

Colophon: Nil.

Subject:

कवेराश्रयश्रीछत्रपतिशिवाजिराजपरंपरावर्णनं, कवेः कुलवर्णनञ्च ॥

Remarks:— The Ms. is in good condition, and copied.

॥ ताराहस्यवृत्तिः ॥

TĀRĀRAHASYAVṚTTIḤ

தாராரஹஸ்யவிருத்தி

Supplemental No. 609. Bundle No. 18. Burnell's No. 7128.
Substance — Paper. Sheets—1-36. Script — Devanāgarī.
No. of Granthas —448. Incomplete.
Author —श्रीमदादिशंकरभगवत्पादाः ।

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरवे नमः ॥

अविघ्नमस्तु ॥

ऊर्जितानन्दगहनां सर्वदेहशरीरिणीम् ।
परां वाग्रूपिणीं वन्दे महानीलसरस्वतीम् ॥

End:

हृल्लेखामध्ये अमुकं मारयेत्यादि साध्यसंहितमित्यर्थः । सहस्रं परिसंजप्येत्यमुकं मारय मारयेत्यन्ते मंत्रजापः ॥

Colophon: Nil.

Subject:

नित्यकर्मविधिः । प्राणायामः । ताराध्यानं, गायत्रीयन्त्रं, पूजा स्तुतिः, प्रयोगाश्च ॥ प्रयोगेषु बहवो विशेषा वर्तन्ते ॥

Remarks :— The Ms. is in decaying condition and copied.

॥ श्यामारहस्यम् ॥

ŚYĀMĀRAHASYAM

சியாமாரஹஸ்யம்

Supplemental No. 610. Bundle No. 18. Burnell's No. 7129. Substance—Paper. Sheets—32-47(=16). Script-Devanāgarī. No. of Granthas—475. Incomplete.

Author— पूर्णानन्दगिरिः ।

Beginning :

... त्कुण्डलिनीं ब्रह्मपथेन परशिवान्तं ध्यात्वा हृदयाष्टदले समानीय मूलेन मूर्तिं कल्पयेत् ॥ तदुक्तं तन्त्रार्णवे ॥

End :

,,	—1	வாதமுறை
,,	—1	चिदंबरसभानटनमन्त्रः ।
,,	—1	வசியமந்திரங்கள்
,,	—1	தேவாங்குகல்பம்
,,	1—36	மூலிகை பிரயோக மந்திரங்கள்
,,	1—13	யந்திரங்கள் (மலையாளங்கலந்தவை)
,,	1—6	देवीध्यानं (वामकेश्वरोक्तं)
,,	1—5	वीरभद्रमालामन्त्रौ यन्त्रं च ॥
	97	

Remarks:—

मातृकेयमतिप्राचीना अतीव कीटजग्धा झर्झरिता च ॥

॥ मृत्युंजयमन्त्रादयः ॥

MṚTYUÑJAYAMANTRĀDAYAḤ

மிருத்யுஞ்சயமந்திரம் முதலியவை

Supplemental No. 870. Burnell's No. 12104. Substance—

Palm leaf. No of leaves—7. Script—Grantha. No. of Granthas—70. Complete. Author—Nil.

Beginning:

अस्य श्रीमृत्युंजयत्रियंबकमन्त्रस्य मैत्रावरुणपुत्रो वसिष्ठ ऋषिः । अनुष्टुप् छन्दः ॥

End:

त्रियंबक महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥
तावकस्त्वद्गतप्राणः त्वच्चित्तोहं सदा मृड ।
इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्रियंबकम् ॥

Colophon: Nil.

Subject:

Leaves	1—2	मृत्युञ्जयमन्त्रः
,,	—1	शकलहोमक्रमः
,,	1—2	वास्तुशान्तिहोमक्रमः
,,	1—2	मृत्युंजयमन्त्रः ॥
	7	

Remarks :—

मातृकेयं प्राचीना कीटविद्धा च

॥ हनूमद्विषयादयः ॥

HANŪMADVIṢAYĀDAYAḤ

ஹநூமத்விஷயம் முதலியவை

Supplemental No. 871. Burnell's No. 12105. Substance—Palm leaf. No. of leaves—129. Script—Grantha. No. of Granthas—1500.

Author— व्यासविश्वामित्रागस्त्यादयः ।

Beginning:

हृदयोदयगुह्येषु जान्वोः पादतलेषु च ।
अनेन मनुना पश्चात् व्यापयेत्स ... ... ॥

End:

शान्तिकर्माणि कुर्वीत पुष्टिकर्म तथैव च ।
क्रमेण युक्तियोज्यानि मन्त्राणां सर्वसिद्धये ॥

Colophon:

इत्यगस्त्यप्रोक्तपुरश्चरणपटलः ।

Subject:

Leaves	1—4	हनूमन्न्यासः, अष्टकर्मप्रयोगाश्च ।
,,	1—3	गणपत्याराधनक्रमः पुत्रदः, दानं च पुत्रदं ।
,,	1+1=2	कार्तवीर्यमन्त्रः हनुमन्मन्त्रश्च ।
,,	1—6	नृसिंह्मयन्त्रपूजा नृसिंह्मायुताणमाला च ।
,,	1—8	कार्तवीर्यमन्त्रप्रयोगः ।
,,	1—6	वन्ध्यादोषहरकल्पः (कर्मविपाकोक्तः)
,,	1—11	शिवपूजाविधिः, न्यासाः, पञ्चाक्षरमन्त्रश्च ।
,,	15+7=22	गायत्रीकल्पः (विश्वामित्रोक्तः, अगस्त्योक्तश्च)
,,	1—27	वैरिञ्चकल्पः (नारसिंह्मे) 2—7 (=6) अध्यायाः ।
,,	1—12	हनुमन्मन्त्र, यन्त्र, पूजा, माला, प्रयोग, न्यासाः विभीषणकृतहनुमत्स्तुतिश्च ।
,,	1—10	महागणपतिकल्पः (पारंपर्यागतसिद्धरत्नमालोत्कर्षे 1—3 पटलाः ।
,,	1—3	महावीरहनुमन्मन्त्रः हनुमन्मन्त्रान्तरञ्च ।
,,	1+1=2	लक्ष्मीनृसिंह्ममन्त्रः रामषडक्षरसीतादिमंत्राश्च ।
,,	1—8	सुदर्शनमन्त्रः, यंत्रपूजा शान्तिकर्म च ।
,,	1—5	नृसिंह्मकवचं भूतबीजयंत्रगुणक्रियाश्च ।
	129	

Remarks :—

मातृकेयमतिप्राचीना कीटजग्धा झर्झरिता । पत्राणि चास्या बहुशो भग्नानि ।

॥ महागणपतिमन्त्रादयः ॥

MAHĀGAṆAPATIMANTRĀDAYAḤ

மஹாகணபதிமந்திரம் முதலியவை

Supplemental No. 872. Burnell's No. 12106. Substance—Palm leaf. No. of leaves—34. Script—Grantha. No. of Granthas—4600. Complete. Author—?

Beginning :

ऐं ह्रीं श्रीं परमशिवानन्दश्रीकामेश्वर्यंबाश्रीदिव्यौघानन्दनाथ-
महौघानन्दनाथश्रीसर्वौघानन्दश्री + ॥

End :

पूर्णाहं मन्त्रवीर्यस्फुरणपरशिवात्कापिलादाप्ततत्वात्
ज्ञानानन्दाद्यमीन्द्राद्विकासितहृदयो विश्वरूपप्रसक्षु ।
नानास्रोतोधिगम्य प्रसंग परगत्याप्तिदीक्षितामनोज्ञां
संगृह्णातिस्म शिष्यप्रणयमनुसरन् पद्धतिं मुक्तिमुक्त्यै ॥
श्रीकैलासानन्दनाथ श्रीगुरवे नमः ॥

Colophon :

इति अगस्त्यसंहिता प्रकारयन्त्रप्राणप्रतिष्ठाविधिस्समाप्ता ॥

Subject :

Leaves	1—4+1=5	तुर्याक्रमः, आम्नायभागश्च
,,	1—3 & 1—10=13	पूर्तिविद्यादयः, काचन विषयसूचिका (नष्टार्धभागा)
,,	1—3=3	वैद्यविषयः
,,	1—5=5	त्रिकूटारहस्यं (1—8 पटलाः, 8 पटलः असमाप्तश्च)

,,	1	ज्वरहरकुबेरयंत्रं, ज्वरहरमन्त्राश्च ।
,,	1-5	देवीपूजाविधिः, यजनविधिः, काचन सूची च ।
,,	1—9	विद्यागणेशमन्त्रः, महागणपतिमंत्रः, यंत्रं च । रमारमेशादि आमोदादि वसुधारादि मन्त्राः, पञ्चावरणस्तुतिः, काम्यप्रयोगाः, सर्वज्ञत्वादिशक्तिमन्त्राश्च ।
,,	1—3	दशाभुक्तिकालसूचिका ।
,,	1—17	यंत्रप्राणप्रतिष्ठाविधिः, चिदंबरयामलचक्रं च ।
,,	1—20	भुवनेश्वरीकच्छपुटे 1—11 पटलाः ।
,,	21—27	भुवनेश्वरीकल्पः (मन्त्रकच्छपुटं)
,,	1—7	नित्याराधनक्रमः ॥
	94	

Remarks :

मातृकेयं प्राचीना कीटजग्धा झर्झरिता भग्नपत्रा च । विद्यागणेशमन्त्रमारभ्य आन्तं समीचीना स्थितिः ॥

॥ देवीभुजंगादयः ॥

DEVIBHUJANGĀDAYAH

தேவீ புஜங்கம் முதலியவை

Supplemental No. 873. Burnell's No. 12107. Substance—Palm leaf. No. of leaves—28+1 (=29). Script—Grantha. No. of Granthas—575. Complete.

Author— श्रीमच्छंकरभगवत्पादाः ।

Beginning :

अगजाननपद्मार्कं गजाननमहर्निशम् ।

अनेकदंतं भक्तानामेकदन्तमुपास्महे ॥

End :

चिन्तामणिस्तोत्रमिदं पठिष्यन् पापैरपस्मारमुखैश्च रोगैः ।
ज्वरैरशेषैरपमृत्युभिश्च मुक्तश्चतुर्वर्गफलं लभेत्सः ॥

Colophon :

इति श्रीमहात्रिपुरसुन्दर्याश्चिन्तामणिस्तोत्रं संपूर्णम् ॥

Subject :

Leaf No. 1.		काचन विषयसूची ।
,,	1—3	देवीभुजंगस्तोत्रं भगवत्पादकृतम् ।
,,	—4	देव्युपनिषत् (त्रिपुरोपनिषत्) ।
,,	5—6	भावनोपनिषत् ।
,,	6—14	देवीस्तवराजः ।
,,	14—19	देवीसौभाग्यकवचम् ।
,,	—20	आम्नायस्तोत्रम् ।
,,	21—23	अम्बास्तवः ।
,,	24—28	त्रिपुराचिन्तामणिस्तोत्रम् ।

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा च । 3 पत्रे भागार्धं नष्टं 23 पत्रं भग्नं च ॥

॥ महालक्ष्मीरत्नकोशः ॥

MAHĀLAKṢMĪRATNAKOŚAḤ

மஹாலக்ஷ்மீரத்னகோசம்

Supplemental No. 874. Burnell's No. 12108. Substance—Palm leaf. No. of leaves—42. Script—Grantha. No. of Granthas—950. Complete.

Beginning :

त्रिणेत्रं कमलाकान्तं नृसिंहं चन्द्रशेखरम् ।
नत्वा संक्षेपतो वक्ष्ये श्रीविद्यामन्त्रनायकम् ॥

End:

भृगुवारे च रात्रौ तु पूजयेत् पुस्तकद्वयम् ।
सर्वथा सर्वथा सत्यं गोपयेत साधयेत् सुधीः ॥
गोपनात् सा + + + + ॥

Colophon :

इति गौडपादमन्त्ररत्नसूत्राणि समाप्तः ॥ ?

Subject :

Leaves	—1	त्रिपुरसुन्दरीविषयः (आद्यन्तहीनः) ।
,,	1 & 2	दीक्षाखण्डः प्रथमः ।
,,	1—3	मुद्रालक्षणानि ।
,,	1—4	आनन्दयागविधिः ।
,,	1 &2	उपनिषद्भागः ।
,,	9 &10=2	भुवनाधिपतिमन्त्रकल्पे द्वितीयः पटलः ।
,,	11=1	भुवनाधिपतिमन्त्रकल्पे तृतीयः पटलः ।
,,	12=1	,, ,, चतुर्थः पटलः ।
,,	1—2	गौडपादसूत्रं (शाक्तं मन्त्ररत्नसूत्राख्यम्) ।
,,	1—8	पञ्चमीस्तवराजः ।
,,	1+1+1=3	संवित्स्तोत्रं संविन्मन्त्रश्च ।
,,	1—5	सौभाग्यरत्नाब्धौ 35 पटले अन्तिमभागः, दिङ्म-मंगळध्यानं (देवीध्यानं), वामकेश्वरे 38 पटलः ।
,,	—1	शूलिनीमंत्रः ।
,,	1—3	देवीस्तुतिः ।
,,	1—4	नारायणहृदयम् ।
	42	

Remarks:

मातृकेयं अतिप्राचीना कीटजग्धा कचिन्नष्टपत्रभागा च ।

॥ मन्त्रदीक्षाक्रमः ॥

MANTRADĪKṢĀKRAMAḤ

மந்த்ரதீக்ஷாக்ரமம்

Supplemental No. 875. Burnell's No. 12109. Substance—Palm leaf. No. of leaves—4. Script — Telugu. No. of Granthas—325. Incomplete.

Beginning :

सिद्धारिकोष्ठार्थं कोष्ठोद्धारक्रमः कथ्यते ।

तत्र चतुष्पदयुक्तकोष्ठचतुष्टयं कृत्वा + ॥

End :

कुण्डस्य गर्तमेखलादीनां चतुर्विंशत्यंगुलमानयुक्तं । तदपि हस्तमानाधिक्यानुसारेण वर्धनीयं । अथ शारदातिलकोक्तप्रकारेण कुण्डस्य हस्त + + + ॥

Colophon ?

Subject :

सिद्धारिशोधनं । ऋणधनशोधनं । तिथिवारनक्षत्रादिपरीक्षा । ग्रथितादिमन्त्रदोषाः । सद्गुरोरभावे मन्त्रग्रहणविधिः । कुण्डलक्षणं च ॥

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा विशीर्णनष्टपत्रभागा च ॥

॥ सारस्वतदशकम् ॥

SĀRASVATADAŚAKAM

ஸாரஸ்வத தசகம்

Supplemental No. 876. Burnell's No. 12110. Substance—Palm leaf. No. of leaves—3. Script — Telugu. No. of Granthas—100. Incomplete.

Beginning :

अंकुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥

End :

यस्यास्स्मरणमात्रेण वाग्विभूतिर्विजृंभते ।
सा भारती चिरं नित्यं रमतां मन्मुखांबुजे ॥

Colophon :

इति दशश्लोकी ॥ श्रीशारदांबायै नमः । श्रीसरस्वत्यै नमः ॥ श्रीवागीश्वर्यै नमः ॥ श्रीमदंबायै नमः ॥

Subject :

दशश्लोकीस्तोत्रमन्त्रः । प्रणोदेवीत्यादिदशऋङ्मन्त्राः । तासां प्राशस्त्यकथनञ्च ॥

Remarks:—

मातृकेयमतिप्राचीना झर्झरिता प्रतिपत्रं नष्टपङ्क्तिश्च ॥

॥ देवीनवरत्नमालिकास्तवादयः ॥

DEVĪNAVARATNAMĀLIKĀSTAVĀDAYAḤ

தேவீநவரத்நமாலிகாஸ்தவம்முதலியன

Supplemental No. 877. Burnell's No. 12111. **Substance—Palm laef.** No. of leaves—13. Script—Grantha. **No. of** Granthas—125. Complete.

Author— श्रीमच्छंकरभगवत्पादादयः ।

Beginning:

... ...

हारदामपरिशोभमानुकुचभारभीरुतनुमध्यमां ।
वीरगर्वगल ... ... रणेशवरपीठिकां
मारवैरिसहचारिणीं मनसि भावयामि परदेवतां ॥

End :

कवचं मोहनं लोके कवचं लक्षणं परम् ।

कवचं मातृवद्देव्यं कवचं वित्तवत्सदा ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे श्रीमद्देवीकवचस्तोत्रं संपूर्णम् । श्रीदेव्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ हरिः ओम् ॥ शुभमस्तु ॥

Subject :

Leaves 1--3 देवीनवरत्नमालिकास्तवः चन्द्रशेखराष्टकभागश्च । शंकरभगवत्पादकृतः ।

1 स्वर्णाकर्षणभैरवमन्त्रः ।

1 अन्नपूर्णामन्त्रः ।

1 आपदुद्धारकमन्त्रः ।

1 त्र्यंबकमन्त्रः (असमग्रः) तेलुगु ।

1 उमास्तवः ।

2—4 शीतलास्तवः (किञ्चिन्नष्टः) तत्प्रयोगश्च ।

5--6 देवीकवचम् (मार्कण्डेयपुराणोक्तं) ।

Remarks:—

मातृकेयं प्राचीना कीटविद्धा विशीर्णनष्टपत्रदशा च ॥

॥ भुवनेश्वरीकच्छपुटम् ॥

BHUVANEŚVARĪKACCHAPUTAM

புவநேச்வரிகச்சபுடம்

Supplemental No. 878. Burnell's No. 12112. Substance—Palm leaf. No. of leaves—45. Script—Grantha. No. of Granthas—1150. Complete.

Author— शिवस्कन्दसंवादात्मकम् ।

Beginning:

शृणु षण्मुख तत्वज्ञ सर्वभूतहिते रत ।

देव्याश्च भुवनेश्वर्याः पुरश्चरणमुत्तमम् ॥

End :

भोगी रघुः पटुर्गौरी लंका पुत्री खगो भुवि ॥
अध्रुवं व्युत्क्रमेणैव लेख्यं सर्वेषु कर्मसु ॥

Colophon :

इति मन्त्रकच्छपुटं समाप्तम् ॥

Subject:

भुवनेश्वरीमन्त्रपुरश्चर्याविधिः । नानाप्रयोगविधिः । नानायन्त्राणि ।
नानामन्त्राश्च ॥ தமிழுரையுடன்.

Remarks :—

मातृकेयं अतिप्राचीना कीटविद्धा च ॥

॥ सुदर्शनमन्त्रादयः ॥

SUDARŚANAMANTRĀDAYAḤ

ஸுதர்சனமந்திரம் முதலியவை

Supplemental No. 879. Burnell's No. 12113. Substance—Palm leaf. No. of leaves—69. Script—Grantha. No of Granthas—1750. Complete.

Author— शिवपार्वतीसंवादात्मकः ।

Beginning :

ओं सुदर्शनषडक्षरीमन्त्रः । स च दशपर्यायशब्दसूत्रवर्मोतिकः ।
प्रणवादिश्च स भवति ॥

End :

त्वमन्नपूर्णापि कृशासि मध्ये श्यामापि संफुल्लजपाभिरामा ।
... वनस्थाप्यवनप्रसक्ता ... ... प्यपर्णा ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पे उमामहेश्वरसंवादे शंकरेण विरचिते प्रत्यक्ष-
सिद्धिप्रदे महालक्ष्मीरत्नकोशे त्रिसप्ततितमोऽध्यायः ॥

Subject:

Leaves. No.	1—8	सुदर्शनमन्त्राः, यन्त्रं, प्रयोगाश्च ।
,,	1+1=2	अमृतेश्वरी, शिवपञ्चाक्षरीमन्त्रौ । प्रत्यंगिरायन्त्रं च ।
,,	1—4+1=5	शरभमन्त्रः, पुरश्चर्या, यन्त्रं, पूजा, स्तुतिश्च ।
,,	1	प्रत्यंगिराऋचां प्रतीकमात्रं ।
,,	5—7=3	शरभस्तुतिः मालामन्त्रश्च ।
,,	1—13	प्रत्यंगिरामन्त्रविधानं, वैश्वानरमन्त्रप्रयोगोपेतं
,,	1—3	प्रत्यंगिराऋचः ।
,,	1—2	शूलिनीमन्त्राः । अन्नपूर्णामन्त्रश्च । (महालक्ष्मीरत्नकोशे 65—73 अध्यायाः)
,,	1—4	षड्विधशूलिनीमन्त्रप्रयोगाः ।
,,	5—16=12	प्रत्यंगिरामन्त्रप्रयोगप्रकारः, प्रतिक्रिया च ।
,,	17=1	प्रत्यंगिराऋचां ऋषिच्छन्दोदेवताः ।
,,	18—20=3	प्रतिक्रियास्तोत्रम् (आकाशभैरवतन्त्रे)
,,	1—2	अन्नपूर्णास्तोत्रम
,,	1	शीतळास्तोत्रं, शीतळामन्त्रश्च ।
,,	1	त्रिपुरसुन्दरीस्तुतिः ।
,,	1—4	सरस्वतीपूजाविधिः ।
,,	1—3	स्वयंवरामन्त्रः न्यासाश्च ।
,,	1	अन्नपूर्णामन्त्रः, स्तुतिश्च ।
	69	

Remarks:

मातृकेयं अतिप्राचीना कीटविद्धा च । अन्त्ये पत्रचतुष्टये भागो नष्टः । आदौ अष्ट पत्राणि नूत्नानि दृश्यन्ते ॥

॥ पञ्चाक्षरमन्त्रभेदाः ॥

PAÑCĀKṢARAMANTRABHEDĀḤ

பஞ்சாக்ஷரமந்திரபேதங்கள்

Supplemental No. 880. Burnell's No. 12114. Substance—Palm leaf. No. of leaves—11. Script—Grantha. No. of Granthas—300. Incomplete.

Author— आगमोक्ताः ।

Beginning :

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिगणानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥

End:

कुर्वन् मादेकपादं शिवकरममृतमेकपादं भुजंगं ।
तत्वं तित्तीति तिष्ठन्मनसि नटवरो जायते नीलकण्ठः ॥

Colophon :

इति विमलागमे प्रासादमन्त्रपटल षण्णवति ॥

Subject :

चिदंबरयन्त्रकथनं । तदुपयुक्ताः पञ्चविंशतिविधपञ्चाक्षरमन्त्रभेदाः । तेषां नामानि, शक्तयः, फलानि च ॥

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा झर्झरिता विशीर्णनष्टपत्रप्रान्तभागा च ॥

॥ रामार्चनचन्द्रिका ॥

RĀMĀRCANACANDRIKĀ

ராமார்ச்சநசந்திரிகை

Supplemental No. 881. Burnell's No. 12115. Substance—

Palm leaf. No. of leaves—49. Script — Telugu. No. of Granthas—630. Complete.

Author — आनन्दवननामा ।

Beginning:

... ... शाद्राजन् त्वया चीर्णे व्रतोत्तमे ।
अर्घ्यप्रदानसमये फलतोयं त्वयोज्झितम् ॥

End:

शुभं हनुमता प्रोक्तं मन्त्रराजात्मकं स्तवम् ।
पठत्यनुदिनं यस्तु स रामे भक्तिमाप्नुयात् ॥

Colophon:

इति हनुमत्प्रोक्तश्रीमन्त्रराजस्तवं संपूर्णम् ॥

Subject:

Leaves	68—73=6	रामप्राशस्त्यम् , गुरुशिष्यलक्षणम् , सिद्धारिशोधनं च
,,	74—81=8	राममन्त्राः, सीता, राम, लक्ष्मण हनुमन्मन्त्राः (रामार्चनचन्द्रिकायां प्रथमः पटलः)
,,	82—92=11	प्राणायामविधिः न्यासाश्च (रामार्चनचन्द्रिकायां द्वितीयः पटलः)
,,	93—101=9	ध्यानं, मानसिकपूजा, अन्तर्यजनं, मुद्रालक्षणानि च (अगस्त्यसंहितोक्तानि)
,,	102—115=14	नवावरणयन्त्रपूजाविधिः, नित्यहोमविधिः, स्तुतिश्च (हिरण्यगर्भसंहितोक्ताः)
,,	—116=1	हनुमत्प्रोक्तराममन्त्रराजस्तवः ।
	49	

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा खण्डितनष्टपत्रभागा च ॥

॥ भावनोपनिषदादयः ॥

BHĀVANOPANIṢADĀDAYAḤ

பாவனோபநிஷத் முதலியவை

Supplemental No. 882. Burnell's No. 12116. Substance—Palm leaf. No of leaves—112. Script—Grantha. No. of Granthas—1000. Complete. Author—Nil.

Beginning :

श्रीगुरुः सर्वकारणभूता शक्तिः ॥ तेन नवरन्ध्ररूपो देहः । नवशक्तिरूपं श्रीचक्रम् ॥

End:

एकाक्षरलक्ष्मीमन्त्रं ए १. श्रीसूक्तनिरूपणं ए १७. शान्तिस्तवं एडु ५ आह संपुटम् ?

Colophon :

इति महाषोढान्यासः समाप्तः (in leaf No. 27)

Subject:

Leaves	1—3	भावनोपनिषत् ।
,,	9+17+24+27=77	योगपीठ, चक्र, लघुषोढा, महाषोढान्यासाः ।
,,	1—2	शरभमन्त्रः, राजमातंगीमन्त्रश्च ।
,,	3&4=2	प्रायश्चित्तस्तुतिः ।
,,	5—17=13	सावरणमाध्यान्दिनपूजा, सायंकालपूजा च ।
,,	7&8=2	श्रीचक्रन्यासभागः ।
,,	1—5=5	पञ्चब्रह्म, पञ्चांगुलि, पञ्चांग, पञ्चदिक् अष्टत्रिंशत्कलान्यासाः (शैवाः) ।
,,	1—6=6	शैवी आवरणपूजा (असमग्रा) ।
,,	1&2=2	लक्ष्मीएकाक्षरमन्त्रः, श्रीसूक्तं च ।
	112	

Remarks :—

मातृकेयं प्राचीना कीटविद्धा च ।

॥ नृसिंहतापिन्यादयः ॥

NṚSIMHATĀPINYĀDAYAḤ

ந்ருஸிம்ஹதாபிநீமுதலியவை

Supplemental No. 888. Burnell's No. 12117. Substance—Palm leaf. No. of leaves—31. Script — Telugu. No. of Granthas—700.

Beginning :

ओं भद्रं कर्णेभिः शृणुयाम देवाः + ओं शान्तिश्शान्तिश्शान्तिः ॥

End :

घटिकाशेषमङ्गलायै न० । घनवर्णभ्रमरकायै न० ।
घनवामनसंस्मृतायै न० । घृणावत्यै न० ।

Colophon :

इत्याथर्वणे नृसिंहतापिनीये नवमः खण्डः ॥

Subject :

Leaves	1—22	नृसिंहतापिनी, आनुष्टुभमन्त्रः, स्तुतिश्च ।
,,	1	मातृकासरस्वतीमन्त्रः ।
,,	1	शतस्थानन्यासः ।
,,	1—5	लक्ष्मीचतुर्विंशत्युत्तरात्रिशतीस्तोत्रम् ।
,,	1 & 2	नामावलिः (असमग्रा) ।

Remarks:—

मातृकेयं प्राचीना कीटविद्धा च ॥

॥ शिवमन्त्रविग्रहकवचादयः ॥

ŚIVAMANTRAVIGRAHAKAVACĀDAYAḤ

சிவமந்த்ரவிக்ரஹகவசம் முதலியவை

Supplemental No. 881. Burnell's No. 12118. **Substance—** Palm leaf. No. of leaves—25. Script—Telugu. **No. of** Granthas—600. Complete.

Author – **शैवागमोक्तम्** ।

Beginning :

श्रीगणेशाय नमः ॥ अथ शैवागमे शिवोमासंवादे सर्वशिव-मन्त्रविग्रहरूपश्रीपराप्रासादकवचम् ॥

End :

विषकीटानिव क्षिप्रं हन्याच्चानविचारयन् ।
शिक्षणे तु कृते तेषां नृपतिस्सुखमेधते ॥

Colophon :

इति शैवागमे शिवोमासंवादे परशिवमन्त्रविग्रहकवचं संपूर्णम् ॥

Subject :

Leaves 1—6 पराशिवमन्त्रविग्रहकवचम् ।

,, 8&9 शिवकवचं (तुळजेन्द्रनामघटितं) ।

10&11 शिवविष्णवोरभेदकथनं, गणेशद्वादशनामानि च ।

1—5 गणेशकवचं (एकेन्द्रभूपकृतं) ।

1—8 राजरञ्जनपुराणे शूरधर्माध्यायः ।

1+1=2 काञ्चन विषयसूची, नीतिश्लोकौ च ।

25

Remarks :—

मातृकेयं प्राचीना कीटविद्धा च ।

॥ भुवनेश्वरीकल्पादयः ॥

BHUVANEŚVARĪKALPĀDAYAḤ

புவநேச்வரிகல்பம் முதலியவை

Supplemental No. 885. Burnell's No. 12119. Substance—Palm leaf. No. of leaves—51. Script—Grantha. No. of Granthas—700. Complete.

Author— शिवपार्वतीसंवादात्मकम् ।

Beginning :

ओं सह नाववत्विति शान्तिः ॥ श्रीगुरुस्सर्वकारणभूता शक्तिः ।
तेन ... ... स्वरूपा । देहे नवशक्तिस्वरूपं श्रीचक्रम् ।

End :

पीतं ब्रह्मरसं सदाऽधिकतरं पत्रं भजेत्पश्चमं
ध्यातं देवगणैः परं मुनिगणैः मोक्षार्थिभिस्सर्वदा ।

Colophon :

इति प्रपञ्चे महागमे शिवप्रोक्ते प्रथमपुळके देवीमाहात्म्ये द्वादशः पटलः ॥

Subject :

Leaves No. 4+3+1 = 8	भावनोपनिषत्, भुवनेश्वरीकवचं च ।
,, 1—19 = 19	भुवनेश्वरीकल्पे 1—9 पटलाः ।
,, 20 & 21 = 2	पुबद, रक्षाकरकवचः (स्कान्दे सनत्कुमारसंहितायां)
,, —27 = 1	काकवन्ध्याशान्तिः (शातातपोक्ता)
,, —28 = 1	कन्यावन्ध्याशान्तिः (हारीतोक्ता)
,, —29 = 1	महावन्ध्याशान्तिः (अपूर्णा, वसिष्ठोक्ता)
,, 30—35—6	प्रयोगार्हबीजयोजनप्रकारः । (भुवनेश्वरीकल्पे 10—12 पटलाः)
,, 1—4 = 4	सन्तानगोपालमन्त्रः मदनगोपालध्यानं च।
,, 1	चामुण्डानवाक्षरीमन्त्रः ।

,,	1	शूलिनीमन्त्रः ।
,,	1—2 = 2	गुर्वादिपादुकामन्त्राः ।
,,	1	मोक्षधर्मसूत्राणि (असमग्राणि)
,,	1	सिद्धवाहिनीमन्त्रः or अमृतेश्वरीमन्त्रः ।
,,	1 & 2 = 2	लिङ्गाष्टकम ।
,,	1	भैरवीपरं श्लोकद्वयं ।
	51	

Remarks:—

मातृकेयं प्राचीना कीटविद्धा किञ्चिदिव नष्टपत्रभागा च ।

॥ वीरहनुमन्मालामन्त्रादयः ॥

VĪRAHANUMANMĀLĀMANTRĀDAYAḤ

வீரஹநுமன்மாலாமந்த்ரம் முதலியவை

Supplemental No. 886. Burnell's No. 12120. Substance—Palm leaf. No. of leaves—31. Script—Telugu. No. of Granthas—180. Complete.

Author— व्यासः (नानापुराणेभ्यः संगृहीतः) ।

Beginning:

हां हीं हूं हैः हौं हः अन्नमो भगवते अघोरप्रलयकाल-

वीरहनुमन्ताय + ॥

End:

अतिगुह्यतमं शास्त्रं इदमुक्तं मयानघ ।

एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥

Colophon:

इति श्रीमहाभारते कृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम

पञ्चदशोध्यायः ॥ श्रीकृष्णार्पणमस्तु ॥

Subject :

Leaves	1—6	वीरहनुमन्मालामन्त्रः ।
,,	7—10	गरुडकवचं (ब्रह्माण्डपुराणोक्तं) ।
,,	1—5	नारायणकवचं [भागवते बृहस्पतिप्रोक्तं] ।
,,	1—3	हनुमत्कवचं [मार्कण्डेये रामप्रोक्तं] ।
,,	—4	हनूमद्द्वादशनामस्तोत्रम् ।
,,	—1	शकुनफलम् ।
,,	1—6	अष्टोत्तरशतस्वायंभुवविष्णुस्तोत्राणि [ब्रह्माण्डोक्तानि]।
,,	36—40=5	भगवद्गीतायां 15 अध्यायः ।
	31	

Remarks:—

मातृकेयं प्राचीना कीटविद्धा च ।

॥ गारुडमन्त्रप्रयोगाः ॥

GĀRUḌAMANTRAPRAYOGĀḤ

காருடமந்த்ரப்ரயோகங்கள்

Supplemental No. 387. Burnell's No. 12121. Substance—Palm leaf. No. of leaves—11-24+27-57 (=45). Script—Telugu. No. of Granthas—475. Incomplete. Author—?

Beginning :

व्याधिस्तुण्णि क्षयरोगियैन वाण्णि सर्पदष्टमैते दिगदु ।
नाळुगु तेरुवुळकूडिनतोटाप्रुद्दमीदनदीतीरमुन्दु देवालयमुन्दुमानितोटलोनुमसकमाडेटपुडुएह्लसन्दुलनु० ॥

End :

रुद्दुण्डु वेकसेरुडु मन्नुतिन्नपामु इवि पेनुपामुळु ॥

Colophon :—?

Subject:

गारुडमन्त्राः, विषहरप्रयोगाः, विषहरौषधानि, सर्पदष्टदेशकाल-
स्थलादीनां फलानि च ।

Remarks :—

मातृकेयमतिप्राचीना अतीव कीटजग्धा झर्झरिता आन्ध्र-
भाषात्मिका च ॥

॥ विरूपाक्षपञ्चाशिकाव्याख्या ॥

VIRŪPĀKṢAPAÑCĀŚIKĀVYĀKHYĀ

விருபாக்ஷபஞ்சாசிகாவ்யாக்யானம்

Supplemental No. 888. Burnell's No. 12122. Substance—Palm leaf. No. of leaves—215—240 = 26. Script-Telugu. No. of Granthas—300. Complete.
Author— श्रीविद्याचक्रवर्ती ।

Beginning :

नमो विश्वशरीराय विश्वैकात्म्यावभासिने ।
नित्यप्रत्यवमर्शाय शम्भवे विश्वसिद्धये ॥

End:

कृतेयं विवृतिर्लघ्वी श्रीविद्याचक्रवर्तिना ।
गोविन्दचन्द्रश्रीनाम्नि निकषे विनिवेशिता ॥

Colophon : Nil.

Subject :

विरूपाक्षपञ्चाशिकायाः श्रीविद्याचक्रवर्तिकृता विवृतिः ॥

Remarks:—

मातृकेयं प्राचीना कीटजग्धा च । आदौ पत्रद्वये भागो नष्टः ।

॥ आनन्दकन्दम् ॥

ĀNANDAKANDAM

ஆநந்த கந்தம்

Supplemental No. 889. Burnell's No. 1212ⁿ. Substance—Palm leaf. (श्रीताळपत्रम्) No. of leaves-87. Script-Malayalam. No. of Granthas-500. Complete.

Beginning :

End :

Colophon :

Subject :

जातकस्फुटविधिः, गणितं च ।

Remarks:—

मातृकेयं प्राचीना । स्थितिरस्यास्समीचीना । प्रतिपत्रं एकस्मिन्नेव पुटे ग्रन्थोयं विलिखितश्च ॥

॥ रश्मिमालामाहात्म्यम् ॥

RAŚMIMĀLĀMĀHĀTMYAM

ரச்மிமாலாமாஹாத்ம்யம்

Supplemental No. 890. Burnell's No. 12123. Substance—Palm leaf. No. of leaves — 9. Script—Telugu. No. of Granthas—300. Complete.

Author— व्यासः ।

Beginning :

श्रीशिवाय गुरवे नमः ॥ श्रीमहासर्वस्व ।
ब्रह्मर्षिवर्य सर्वज्ञ शृणुष्वावहितो भवान् ।
चिदङ्गभूतां वक्ष्यामि नामतो रश्मिमालिकाम् ॥

End :

साधनं किञ्चिदुक्तं ते प्रत्येकं श्रियमिष्टदम् ।
ब्रह्मपुत्र महाभाग किं भूयः कथयामि ते ॥

Colophon:

इति श्रीसनत्कुमारसंहितायां महारहस्ये वाग्देवताविलासे वेदान्तभूषणे रश्मिमालास्तोत्रमाहात्म्यं संपूर्णम् ॥ श्रीशंकरानन्दनाथगुरुपादुकार्पणमस्तु ॥ महात्रिपुरसुन्दर्यै नमः ॥

Subject :

देवीरश्मिमालास्तोत्रम् , तन्माहात्म्यं च ।

Remarks :—

मातृकेयमतिप्राचीना कीटजग्धा च ॥

॥ मृत्योस्तुल्यविधानम् ॥

MṚTYOSTULYAVIDHĀNAM

மிருத்யோஸ்துல்யவிதானம்

Supplemental No. 891. Burnell's No. 12125. Substance—Palm leaf. No. of leaves—104—109=6 Script—Telugu. No. of Granthas—100. Complete. Author—?

Beginning :

विधानवत् संपूज्य चात्र नमस्कारं अनेन मन्त्रेण कुर्यात् ॥

End :

उत्तुद शमीजा वरितल्पे जतल्प उत्तुद । गिरिरनुप्रवेशय मरीचीरुपसरन्नुदयावदितः पुरस्तादुदयाति सूर्यः ॥ भावदितो शत्रुनामोच्चारणचेसेदि मुन्नाया योस्मान्द्वेष्टि ईवेद्‌ऋक्कुन शकशाराधन चेसि आकलशं वेयन शत्रुमारणं औनु ॥

Colophon : ?

Subject:

मृत्योस्तुल्यमन्त्रविधानं, प्रयोगविधिश्च ।

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा च ॥

॥ सरस्वतीसूक्तादयः ॥

SARASVATĪSŪKTĀDAYAḤ

ஸரஸ்வதீஸூக்தம் முதலியவை

Supplemental No. 892. Burnell's No. 12126. Substance—Palm leaf. No. of leaves—13. (1+1-10+2=13). Script—Grantha & Telugu. No. of Granthas—250. Complete. Author— ऋग्वेदोक्ताः ।

Beginning :

ऐं ह्रीं प्रणो देवी सरस्वती वाजेभिर्वाजिनीवति ।
धीनामवित्र्यवतु ॥

End:

या वेद या वर्णयासा मध्यात्मा व्यक्तनाम च ।
नाम याध्यात्मना प्रत्यक् दशश्लोकीति पठ्यताम् ॥

Colophon :

इति श्रीसुदर्शनकवचस्तोत्रं संपूर्णम् ॥

Subject:

Leaves	1+1—5=6	सरस्वतीसूक्तानि ध्यानादीनि सरस्वतीद्वादशनामस्तोत्रं च ।
,,	6—9	नृसिंहकवचम् ।
,,	9—10	सुदर्शनकवचम् ।
,,	2	सरस्वतीदशश्लोकी (असमग्रा) ।
	13	

Remarks :—

मातृकेयं प्राचीना कीटविद्धा च ।

॥ प्रतिक्रियाशूलिनीस्तोत्रादयः ॥

PRATIKRIYĀŚŪLINĪSTOTRĀDAYAḤ

ப்ரதிக்ரியாசூலிநீஸ்தோத்ராம் முதலியவை

Supplemental No. 893. Burnell's No. 12127. Substance—Palm leaf. No. of leaves—52. Script—Telugu. No. of Granthas—1000. Complete.

Author— नानाग्रन्थसंग्रहः ।

Beginning :

शुक्लांबरधरं विष्णुं + शान्तये ॥

श्रीमत्सकलसूक्ष्मैकबोधकेश जगत्पते ।

प्रतिक्रियास्तोत्रमात्रं प्रवदस्व दयानिधे ॥

End :

भक्तिसिद्धाञ्जनेन त्वत्कटाक्षमाला भक्तिरेव सिद्धाञ्जनं तेन हेतुना विलसता प्रकाशमानेन अक्ष्णा ज्ञानेन नयां न + ॥

Colophon :

इति ब्रह्माण्डपुराणे ललितोपाख्याने स्तोत्रखण्डे हयग्रीवागस्त्यसंवादे श्रीललितादेवीरहस्यनामस्तोत्रं संपूर्णम् ॥

Subject :

Leaves 11, 12 & 18=3	प्रतिक्रियाशूलिनीस्तोत्रं मन्त्रश्च ।
,, 19—21=3	आपदुद्धारण, शत्रुविधूननवीरहनुमन्माला-मन्त्राः ।
,, 22=1	पंचमुखहनुमद्दिग्बन्धनमन्त्रः ।
,, 23, 24=2	तापज्वरहरबलिदानविधिः ।
,, 25 - 27=3	ज्वरहरेश्वरमाला विष्णुकवच इन्द्राक्षी-स्तोत्राणि ।
,, 28 & 29=2	ऋणहरांगारकस्तोत्रं, गुरुयंत्रं च ।
,, 30 & 31=2	शनैश्चरमन्त्र, कवच आदित्यकवचानि ।
,, 50=1	रामषडक्षरीमन्त्रः, माला च ।
,, 52=1	रामकवचभागः ।

Leaves	1—4=4	कार्तवीर्ययन्त्रमन्त्रकवचानि ।
„	5—7+2=5	दुर्गास्तवः (महाभारते अर्जुनकृतः)
„	1	विष्णुपूजाविधिः ।
„	1	विष्णुकृतशिवनमस्काराष्टकं, कृष्णार्घ्य-चन्द्रार्घ्यश्लोकौ च ।
„	2	राजराजेश्वरीस्तवः ।
„	1—21=21	लक्ष्मीस्तवव्याख्या असमग्रा ।
	52	

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा झर्झरिता विशीर्णनष्टपत्रभागा नानाविधपत्रजातमयी च ॥

॥ वृन्ताकप्रयोगः ॥

VṚNTĀKAPRAYOGAḤ

புல்லுறவிபிரயோகம்

Supplemental No. 894. Barnell's No. 12128. Substance—Palm leaf. No of leaves—30. Script — Telugu. No. of Granthas—150.

Beginning :

विशाखानक्षत्रान ऊशिरिकि बदरी केले पूजिञ्चि चातवुण्ट अदृश्यकरणी ॥

End :

बोल्लुल्लाहि चेञ्चुनासु बिस्पु उम्मुह बन्दुह बुवरेचित्रे मेरो-कोमरोत्तरे अ० ॥

Colophon : ?

Subject :

अश्विन्यादिषु नक्षत्रेषु वृन्ताकग्रहणफलम् ॥ जालक्रियादिकं च ॥

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा च ॥

॥ कुरुकुल्याकवचादयः ॥

KURUKULYĀKAVACĀDAYAḤ

குருகுல்யாகவசாதிகள்

Supplemental No. 895. Burnell's No. 12129. Substance—Palm leaf. No. of leaves—7, Script — Grantha. No. of Granthas—175. Incomplete.

Author— शिवपार्वतीसंवादात्मकः ।

Beginning:

कामरूपिण्यवत्वग्नौ नैर्ऋत्यां कामचारिणी ।
काममातर वायव्ये त्रैलोक्यां कामनायिका ॥

End:

आपत्काले नित्यपूजां विस्तरात्कर्तुमक्षमः ।
एकवारे जपदिनं? सांगपूजाफलं लभेत् ॥
श्रीमहात्रिपुरसुन्दर्यै नमः ॥

Colophon:

इति श्रीत्रिपुरसुन्दरीतन्त्रे उमामहेश्वरसंवादे श्रीराजराजेश्वरी-श्रीमहात्रिपुरसुन्दरीध्यानतन्महिमादिवर्णनन्नाम अष्टत्रिंश-त्पटलः ॥

Subject:

कुरुकुल्याकवचभागः, राजराजेश्वरीध्यानमहिमादिवर्णनं, त्रिपुर-सुन्दरीमालामन्त्रश्च ॥

Remarks:—

मातृकेयं प्राचीना कीटविद्धा मूषकभक्षितपत्रैकदेशा, भग्ननष्टपत्रैक-देशा च ॥

॥ त्रैलोक्यमङ्गळकवचम् ॥

TRAILOKYAMAṄGAḶAKAVACAM

த்ரைலோக்யமங்களகவசம்

Supplemental No. 896. Burnell's No. 12130. Substance—Palm leaf. No. of leaves—16. Script—Telugu. No. of Granthas—125.

Author— शिवपार्वतीसंवादात्मकम् ।

Beginning :

शिरो मे वाग्भवः पातु कएईलह्रीं स्वरूपकम् ।
सहकलह्रीं ललाटं च पातु कामेश्वरी मम ॥

End :

अष्टादशाक्षरी ब्रह्मा? हृदि मामभितोऽवतु ।
इति ते कथितं देवि ब्रह्मविद्याकळेवरम् ॥
त्रैलोक्यमोहनं ... . ॥

Colophon :

इति रुद्रयामले त्रैलोक्यमङ्गळं नाम कवचं समाप्तम् ।

Subject :

Leaves 1—8 देवीत्रैलोक्यमङ्गलकवचम् (समग्रं)।
,, 1 त्रैलोक्यमोहनकवचभागः ।
,, 1—2 त्रिपुरसुन्दरीकवचभागः ।
,, 1—5 देवीत्रैलोक्यमोहनकवचम् (असमग्रं)

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा नष्टपत्रैकदेशा प्रतिविषयं भिन्नभिन्नपत्रात्मिका च ॥

॥ बगलामन्त्रादयः ॥

BAGALĀMANTRĀDAYAḤ

பகளாமந்திரம் முதலியவை

Supplemental No. 897. Burnell's No. 12131. Substance—Palm leaf. No. of leaves—7. Script—Telugu. No. of Granthas—210. Complete.

Beginning :

...रणबाणाय नमः । उन्मादनबाणाय नमः ।
बाणार्णभे वसुदले ब्रह्माण्याद्यष्टकं यजेत् ॥

End :

ध्यायेत्सिंहासनासीनां प्रसन्नवदनांबुजाम् ।
इन्द्रनीलमणिश्यामां नवनीलोत्पलश्रियम् ॥

Colophon :

इति श्रीरुद्रयामळे वामकेश्वरतन्त्रे शतसहस्रकोटिविस्तारे श्रीमहात्रिपुरसुन्दरीस्तवराजस्तोत्रं संपूर्णम् ॥

Subject :

Leaves	1—3	बगळामन्त्रः, मातृकास्थानानि कन्यकापूजाविधिश्च ।
,,	4—7	सौभाग्यसुन्दरीकवचं, स्तवराजः, उच्छिष्टचाण्डालीमन्त्रश्च ।

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा झर्झरिता भग्ननष्टपत्रभागा च ॥

॥ त्रिमेलनविधिः ॥

TRIMELANAVIDHIḤ

த்ரிமேளநவிதி

Supplemental No. 898. Burnell's No. 12152. Substance—Palm leaf. No. of leaves—3. Script—Grantha. No. of Granthas—50. Complete.

Beginning :

अथतः संप्रवक्ष्यामि त्रिमेलनविधित्रयम् ।
महामृत्युंजयन्त्वेकं महावश्यकरं परम् ॥

End :

ओं नमो भगवते वराहरूपाय भूभुवनपतये भूपतित्वं मे देहि
दापय स्वाहा ॥

Colohpon : Nil

Subject :

व्याहृतित्रयसंपुटितः, त्र्यंबकऋक् मृत्युंजयषडर्णोपेतः प्रथमो मन्त्रः । स्वयंवरामन्त्र ऐन्द्रगायत्री अश्वारूढामन्त्रैः द्वितीयः । गोपालविंशत्यर्णमन्त्रस्त्रिबीजाद्यः श्रीबीजसंपुटितः ऐन्द्र-त्रैष्टुभमन्त्रः स्वाहान्तो वराहमन्त्रश्चेति तृतीयः । स्वयंवरा-पञ्चदशीमिलितो मन्त्रः यद्य कश्चेति ऐन्द्रगायत्रीमन्त्रः वराहद्वात्रिंशदक्षरमन्त्रश्च ।

Remarks :—

मातृकेयमतिप्राचीना कीटजग्धा झर्झरिता विशीर्णा भग्ननष्टपत्रैक-देशा च ॥

॥ बगलामन्त्रादयः ॥

BAGALĀMANTRĀDAYAḤ

பகளாமந்த்ரம் முதலியவை

Supplemental No. 899. Burnell's No. 12133. Substance—Palm leaf. No. of leaves—16-58 = 43 + 2 = 45. Script—Grantha. No. of Granthas—450. Complete. Author—Nil.

Beginning :

परमन्त्रभक्षिणीमहाविद्यामहामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । परकृतमन्त्रतन्त्रचूर्णाभिचारक्षुद्रदोषादिमहाभक्षिणी बगलामुखीदेवी देवता ॥

End :

अं आं + कं क्षं क्षः ळः + आः अः इति जपः ॥

Colophon:

इति पञ्चमवर्गः ॥ (in leaf No 52)

Subject :

Leaves	16—18=3	बगलाघोरशरभचिदंबरमृतसंजीविनीमन्त्राः ।
,,	19—27=9	बगलामाला ।
,,	28—32=5	नृसिंहानुष्टुभहनुमन्मालाहनुमन्मन्त्रास्त्रका म-कलामन्त्राः ।
,,	1&2=2	प्रत्यंगिराऋचः ।
,,	33—39=7	,,
,,	40—43=4	दिग्बन्धनकरदिक्पालकमन्त्रः ।
,,	44—52=9	प्रत्यंगिराऋचां प्रत्येकं प्रयोगविधिः फलं च ।
,,	53—55=3	भद्रकालीमन्त्राः ।
,,	56—57=2	स्वयंवरा, काळी, कुब्जिका हनुमन्मन्त्राः ।
,,	—58=1	बाला वाग्वादिनी सिद्धमूली वज्रेश्वरीमन्त्राः ।
	45	

Remarks: —

मातृकेयं अतिप्राचीना कीटविद्धा झर्झरिता । आदौ पञ्चपत्रेषु किञ्चिदिव नष्टा च ॥

॥ प्रत्यंगिरार्ङ्मन्त्राः ॥

PRATYAṄGIRĀṚNGMANTRĀḤ

பிரத்யங்கிராருக்மந்திரங்கள்

Supplemental No. 900. Burnell's No. 12134. Substance—Palm leaf. No. of leaves—15. Script—Telugu No. of Granthas—350. Incomplete.

Author— आथर्वणिको मन्त्रकलापः ।

Beginning :

तच्छंयोरावृणीमहे + चतुष्पदे शान्तिश्शान्तिश्शान्तिः ।

End :

यो मे सर्वगतः पाप्मा परमात्मा तं परमात्मने नमः । इति दिग्बन्धनं कृत्वा + + ॥

Colophon :

सप्तमवर्गस्समाप्तः (in leaf No. 14)

Subject:

प्रत्यंगिराऋचां प्रत्येकं ऋष्यादिकथनपूर्वकं प्रयोगप्रकारः ।

Remarks :—

मातृकेयं प्राचीना कीटजग्धा झर्झरिता विशीर्णनष्टपत्रभागा च ॥

॥ प्रत्यंगिरमन्त्रादयः ॥

PRATYAṄGIRAMANTRĀDAYAḤ

பிரத்யங்கிராமந்திரம்முதலியவை

Supplemental No. 901. Burnell's No. 12135 Substance—Palm leaf. No. of leaves—27. (1, 199-204, 207-214, 17-23, 24-28=27). Script—Telugu. No. of Granthas—650.

Beginning :

जत्तरुंत ... ... जेत्तयणिद्दित्तयणिशेहो ।

अंहाणेत्ति विवेयो हियय परिप्पन्दमेत्तसत्ताणम् ॥

End :

सकलसुकविज्ञनब्बा ? सर्वलोकावलंबा

परिमलनिकुरुंबा भारभास्वन्नितंबा ।

विमलवदनबिंबा विश्वसृग्वक्त्रलंबा

रमणगुणकदंबा राजते शारदांबा ॥

Colophon :

योगीश्वरपुस्तकं श्यामलादण्डकं पुस्तकम् ॥

Subject :

Leaves	—1	धर्मवाक्यानि ।
,,	193—204=6	प्रत्यंगिराऋचां अर्थः प्रयोगाश्च ।
,,	207—214=8	बलिदानविधिः, कृत्यायंत्रं च ।
,,	17—18= 2	भुवनेश्वरीसहस्रनामभागः ।
,,	19—23= 5	शिवभुजंगप्रयातस्तवः ।
,,	24—28= 5	श्यामलादण्डकम् ।
	27	

Remarks :—

मातृकेयं प्राचीना कीटजग्धा च ॥

॥ प्रत्यंगिराकल्पः ॥

PRATYAṄGIRĀKALPAḤ

பிரத்யங்கிராகல்பம்

Supplemental No. 902. Burnell's No. 12136. Substance—Palm leaf. No. of leaves—2-65=64. Script — Grantha. No. of Granthas—450. Incomplete. Author—Nil.

Beginning :

वा भैक्षाहार··· ... ... ष्टोत्तरं जपेत् ।

सर्वदोष न ... ... ॥

End :

ह्रां ह्रीं ह्रूं फट् प्रत्यंगिरे स्वाहा ॥ ... क्षे + ॥

Colophon : ?

Subject :

प्रत्यंगिराऋचां यंत्रप्रयोगादयः ।

Remarks:—

मातृकेयं प्राचीना कीटजग्धा मूषकजग्धबहुपत्रा च । 2—25 पत्रेषु अर्धभागो नष्टश्च ॥

॥ प्रत्यंगिराऋगादयः ॥

PRATYAṄGIRĀṚGĀDAYAḤ

ப்ரத்யங்கிராருக்முதலியவை

Supplemental No. 903. Burnell's No. 12137. Substance—Palm leaf. No. of leaves—9. Script — Telugu & Grantha. No. of Granthas—135. Incomplete. Author—?

Beginning :

अस्या[ः] प्रत्यंगिरसोक्तब्रह्मविद्यायाः प्रत्यंगिरसो भगवन्त ऋषयः । ब्रह्माणः परमेष्ठिन ऋषयः ॥

End :

सं शुक्लवासिनी शसहजाभ्यां नमः । हं प्राणात्मने लकुलीश० ॥

Colophon : ?

Subject :

ऋष्याद्युपेताः साध्योपेताश्च काश्चन प्रत्यंगिराऋचः । मातृकामंत्रभागश्च ॥

Remarks :

मातृकेयं प्राचीना क्रिमिदूषिता किञ्चिदिव नष्टा च ॥

॥ प्रत्यंगिराविषयः ॥

PRATYAṄGIRĀVIṢAYAḤ

ப்ரத்யங்கிராவிஷயம்

Supplemental No. 904. Burnell's No. 12138. Substance—Palm leaf. No. of leaves—4. Script — Grantha. No. of Granthas—75. Incomplete. Author—Nil.

Beginning :

... प्रत्यंगिरासूक्तब्रह्मविद्याया प्रत्यंगिरसो भग ... ... मनुष्टुपश्छन्दः ।

End :

करालवदने प्रत्यंगिरे देवि मां रक्ष रक्ष मम शत्रून् नाशय
ओं ह्रीं नमस्स्वाहा ॥ हरिः ॐ ॥ शुभमस्तु ॥

Colophon : Nil..

Subject :

द्वित्राणां प्रत्यंगिराऋचां ससाध्यं प्रयोगप्रकारकथनम् ।

Remarks:—

मातृकेयं प्राचीना अत्यन्तं कीटजग्धा अतीव झर्झरतया स्वरूप-नाशमुपगता च ॥

॥ साम्राज्यलक्ष्मीपीठिका ॥

SĀMRĀJYALAKṢMĪPĪṬHIKĀ

ஸாம்ராஜ்யலக்ஷ்மீபீடிகை

Supplemental No 905-907 (3 Mss.) Burnell's No. 12139—12141. Substance—Palm leaf. No. of leaves—222, 187 & 130. Script—Telugu! Same as in Ms. No. 6707.

Remarks:—

सर्वा मातृकाः प्राचीनाः कीटविद्धाश्च । अन्तिममातृकापेक्षया मध्यमा, मध्यमापेक्षयापि अग्रिमा मातृका च प्राचीना भाति । प्रथममातृकायां आदौ असमग्रा सूचिका, अन्ते गोपालयंत्रं प्राणप्रतिष्ठाविधिश्च विद्यते । अन्तिममातृकायां संपूर्णा विषयसूचिका भवति । प्रथममातृकायां विषयभेदा-भावेपि पटलसंख्याभेदो दृश्यते । स च मुद्राप्यमाणे पुस्तके द्रष्टव्यः ॥

॥ कौलादर्शः ॥

KAULĀDARŚAḤ

கௌளாதர்சம்

Supplemental No. 908. Burnell's No. 12142. Substance — Palm leaf. No. of leaves —28. Script—Telugu. No. of Granthas—600. Complete.

Author— विश्वानन्दनाथः ।

Beginning :

शुक्लांबरधरं + शान्तये ॥ श्रीशिवाय नमः ॥
नत्वा श्रीगुरुपादुकाश्च परितो वाणीश्च विघ्नेश्वरं
श्रीकामेशमतः पराश्च त्रिपुरादेवीं शुकश्यामलाम् ।
वक्ष्ये कौळिकधूर्तडाम्भिकशठादीनां कुलज्ञानिना-
माचारस्य च लक्षणानि विलसत्सत्कौलिकानां क्रमात् ॥

End :

भोजनमण्डले आदिमं निक्षिप्य परिवेषणार्थं द्वारपूजा ।
दक्षिणे गं गणपतये नमः । उत्तरे क्षं क्षेत्रपालकाय० ॥

Colophon :

इति विश्वानन्दनाथविरचितं कौलादर्शं संपूर्णम् ॥ श्रीगुरु-वराज्ञायै नमः ॥ यादृशं पुस्तकं दृष्ट्वा + न विद्यते ॥

Subject:

Leaves	1—17	कौलादर्शः ।
,,	1—8	कौलशाक्तकल्पसूत्रं । पटलत्रयं संपूर्णम् ।
,,	1—3	शिवपूजापद्धतिभागः ॥
	28	

Remarks:—

मातृकेयं प्राचीना कीटजग्धा च ॥

॥ कच्छपुटप्रयोगः ॥

KACCHAPUṬAPRAYOGAḤ

கச்சபுடப்ரயோகம்

Supplemental No. 909. Burnell's No. 12143. Substance—Palm leaf. No. of leaves—134-16=118 (Leaves 2, 7, 69—80, 85, 86=16 Missing). Script—Grantha & Tamil. No. of Granthas—1600.

Beginning :

बीजाक्षरमकारादिक्षकारान्तं ५१ க்கு தேவதை

अकारं ब्रह्मदैवत्यं श्वेतं सर्ववशंकरम् ।

सर्वसत्वं मनोज्ञत्वं कामरूपत्वमंबिके ॥

End :

वरुणबीजं वं । वायुबीजं यं । कुबेरबीजं सां (सं) । ईशानबीजं शं ॥

Colophon :

इति आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शंकरेण विरचिते शरभसालुवपक्षिराजकल्पन्नाम षोडशोध्यायः ॥

Subject:

Leaves	1—10	मातृकादेवताद्यः, वश्यादिबीजानि यंत्रन्यायः, रोगादिहरयन्त्रदीपश्च ॥
	11—23	कच्छपुटं தமிழுரையுடன்
	24—26	वृष्टिकरवल्लभगणपतिमन्त्रप्रयोगः ।
	27—38	आशुगणपतिकल्पः ।
	—39	सर्वसिद्धिकरः 16 मूलिकाप्रयोगः ।
	40—45	त्रिपुर, दुर्मुख, मदन, हेरम्ब, रुद्राख्यगणपतिमन्त्रैः षट्कर्मप्रयोगः, ध्यानानि च ।
	46—65	देवीपूजाविधिः, कच्छपुटप्रयोगाश्च தமிழுரையுடன்.
	66—82	उच्छिष्टगणपतिमन्त्रप्रयोगाद्यः सिद्धारिशोधनश्च ।

Leaves 83—84 (तापज्वरपैत्योन्मादहरः) चित्रविद्यामन्त्रः, यंत्रं च ।

85—125 शरभमंत्रयन्त्रप्रयोगाः, अष्टकं, माला, गायत्री च । प्रतिक्रियाकालः, काम्यहोम, रक्षांगाभिषेक, ज्वरादिनाशनविधयः, मातृकाक्षरदेवतादयः भद्रा-मन्त्रयन्त्रप्रयोगाश्च । आकाशभैरवकल्पे 16, 26, 27, पटलाः ।

126—130 गरुडमंत्रः, बीजकोशः, भूतादिनिग्रहकरऋचः, विषहर आशुगणपतिमाला च ।

131—134 *அருவக்கணக்கு, வைத்தியம்* ग्रहदिक्पाल-बीजानि च ।

Remarks:—

मातृकेयं प्राचीना कीटजग्धा क्वचित् भग्नपत्रा च ।

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 910. Burnell's No. 12144. Substance—Palm leaf. No. of leaves—150. Script—Grantha. No. of Granthas—3750. Complete.

Author— लक्ष्मणदेशिकेन्द्रः ।

Beginning:

श्रीगणेशाय नमः ॥

नित्यानन्दवपुर्निरर्गळगळत्पञ्चाशदर्णैः क्रमात्

व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।

शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं

तद्वोस्या(व्या)दनिशं शशांकवदनं वाचामधीशं महः ॥

End :

अनाद्यन्तं शंभोर्वपुषि कलितार्धेन वपुषा
जगद्रूपं शश्वत् सृजति महनीयामपि गिरम् ।
सनाथं शब्दार्थैस्तनभरनता शंकरवधू-
र्भवेद्‌च्छाया भूया भवजनितदुःखौघशमनी ॥

Colophon :

इति श्रीशारदातिलके पञ्चविंशतिपटलः ॥ हरिःओं ॥ श्रीरस्तु ॥

Subject :

पञ्चदेवतामन्त्राः । तत्तद्देवतावतारदेवतामन्त्राः । तत्तद्देवतावरण-
देवतामन्त्राः । यन्त्राणि । प्रयोगाः । सिद्धिक्रमाश्च ॥

Remarks :—

मातृकेयं नातिप्राचीना कीटविद्धा कचिन्नष्टपत्रभागा च ॥

॥ शारदातिलकम् ॥

ŚĀRADĀTILAKAM

சாரதாதிலகம்

Supplemental No. 911. Burnell's No. 12145. Substance—Palm leaf. No. of leaves—154. Script—Telugu. Same as in Ms. No. 12144.

॥ सौभाग्यमञ्जरी ॥

SAUBHĀGYAMAÑJARĪ

ஸௌபாக்யமஞ்சரீ

Supplemental No. 912. Burnell's No. 12146. Substance—Palm leaf. No. of leaves—70. Script—Telugu. No. of Granthas—2000. Complete.

Author – नारायणनाथः ।

Beginning :

प्राणायामत्रयं कृत्वा यथावत् दक्षिणनासाग्रे सविसर्गहरिबीज-
सहितज्वलदग्निरूपं ध्यात्वा + ॥

End :

हेमग्रामाधिपतिना भृगुवंशभुवा कृता ।
नारायणेन विदुषा श्रीमत्सौभाग्यमञ्जरी ॥
सुमनोजृंभनोद्भूतरसानिष्यन्दानिर्भरा ।
मञ्ज(रीव मनोज्ञेयं) सतां सौभाग्यमञ्जरी ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यकवितार्किकचक्रवर्ति श्रीदेवराज-
गिरिपूज्यपादप्रशिष्यस्य श्रीविष्णुदेवनाथशिष्यस्य श्रीनारायण-
नाथस्य कृतौ श्रीसौभाग्यमंजर्यां दश(मः पटलः समाप्तः) ॥
श्रीमहात्रिपुरसुन्दर्यै नमः ॥ श्रीत्यागेशाय नमः ॥ ग्रंथसंख्या
2000—

Subject :

साङ्गोपाङ्गः सावरणः त्रिपुरसुन्दरीपूजाविधिः ॥

Remarks :—

मातृकेयमतिप्राचीना कीटविद्धा क्वचित्किञ्चिदिव नष्टा च ॥

॥ सौभाग्यमञ्जरी ॥

SAUBHĀGYAMAÑJARĪ

ஸௌபாக்யமஞ்சரி

Supplemental No. 913. Burnell's No. 12147. Substance—
Palm leaf. Script — Grantha.

Remarks :—

मातृकेयं निस्सारा विशीर्णा स्पर्शासहा अत्यन्तं कीटजग्धा
खण्डितपत्रजाता अनुपयुक्ता च ॥

॥ मन्त्रदेवताप्रकाशिका ॥

MANTRADEVATĀPRAKĀŚIKĀ

மந்த்ரதேவதாப்ரகாசிகை

Supplemental No. 914. Burnell's No. 12148. Substance—Palm laef. No of leaves—129. Script—Telugu. No. of Granthas—4250. Incomplete.

Beginning:

हरिः ओं ॥ रामानन्तकोटीश नमो नमस्ते ॥

ओंकारात्माक्षरादीन् भुवनपाशिवविद्क्षिणामूर्तिचिन्ता
रत्नत्र्यंबकोद्यन्मृतिहरणमहागाणपत्यादिरूपिन् ।
अष्टाभूद्वादशाभूप्रियनृहरितनो श्रीवराहाख्यचक्रिन्
कृष्णात्मन्रामविष्णो विविधगुणमहाशक्तिभास्वन्नमस्ते॥

End :

सर्वात्मने भगवते नमः । इत्यपरपूजा । ततो नारायणं सपरिवारं गन्धपुष्पधूपदीपैः नैवेद्यैरर्चयित्वा आपोशपानीयाचमनीयहस्तस्पर्शतांबूलैस्सुगन्धपुष्पैः छत्रचामरैर्दर्पणनीराजनैः संपूज्य दक्षिणनमस्कारं कृत्वा देवस्याग्रे + ॥

Colophon :

इति मन्त्रदेवताप्रकाशिकायां देवपूजाख्यः सप्तमः पटलः ॥
(in leaf No. 31)

Subject :

अस्यां मातृकायां B. No 6701 मातृकानुसारेण 1—16 पटलान्तो भागः, ततः वैष्णवमन्त्रप्रकरणे कियानेव भागश्च भवति ॥ आदौ सप्तमपटलान्तमेव पटलसंख्या दृश्यते ॥ गणेशमन्त्रप्रकरणे पुनः वैनायकतन्त्रे प्रथमाद्यष्टमपटलान्तं संख्या प्रदर्शिता ॥ विषयप्रतिपादनप्रकारे च उभयोर्मातृकयोर्महान् भेदो दृश्यते । अपि चास्यां मातृकायां कचित्समधिका अपि विशेषाः प्रतिपाद्यन्ते ॥

Remarks:—

मातृकेयं प्राचीना कीटविद्धा च । छिन्नाणि पत्राणि भग्नानि च ॥

॥ मन्त्रदेवताप्रकाशिका ॥

MANTRADEVATĀPRAKĀŚIKĀ

மந்த்ரதேவதாப்ரகாசிகை

Supplemental No. 915. Burnell's No. 12149. Substance—Palm leaf. No. of leaves—147.

Remarks:—

मातृकेयमतिप्राचीना निस्सारा कृमिभक्षिता शिथिलशिथिला स्पर्शासहा अनुपयुक्ता परित्याज्या च ॥

॥ ज्ञानार्णवम्, कुलार्णवश्च ॥

GNANĀRṆAVAM & KULĀRṆAVAM

ஞானார்ணவமும் குலார்ணவமும்

Supplemental No. 916. Burnell's No. 12150. A & B. Substance—Palm leaf. No. of leaves—45+30=75. Script—Telugu. No. of Granthas—1800+1200=3000.

Author— शिवायै शिवेनोपदिष्टम् ।

Beginning :

श्रीगुरुभ्यो नमः । देव्युवाच—

गणेशनन्दिचण्डीशसुरेन्द्रपरिवारित ।

जगद्वन्द्य गणाधीश किन्त्वया जप्यते सदा ॥

End:

कुलभक्तान्कुलज्ञानान्कुलाचारान्कुलावृतान् ।

प्रीतो भवति यो दृष्ट्वा कौलिकः ... ... ॥

Colophon :

इति श्रीकुलार्णवे महारहस्ये तत्वत्रयादिकथनं नाम अष्टमोल्लासः ॥

(in leaf No. 28. b)

Subject :

वर्णमाला । बालान्यासः । त्रिपुरान्यासः । त्रिपुरार्चनाविधिः । बलिदानविधिः । पूर्वसिंहासनविधिः । भैरवीयजनं । पश्चिमसिंहासनविधिः । परिचर्याविधिः । श्रीचक्रस्वरूपकथनं । द्वादशविधश्रीविद्यामन्त्रतदुपासककथनं । श्रीविद्याषोडशाक्षरीभेदमहिमादिकथनं । श्रीविद्यायन्त्रन्यासक्रमः । विद्यान्यासमुद्राविवरणं । त्रिद्यायजनविधिः । श्रीचक्रपूजाविधिः प्रयोगाश्च । रत्नपुष्पविधिः । बीजत्रयसाधनं । जपहोमविधिः । ज्ञानहोमविधिः । दूतीयजनविधिः । (कुमारीपूजनं) अन्तर्दूतीयजनविधिः । दीक्षाविधिः । दमनारोपणं । पवित्रारोपणं ॥ इति क्रमेण ज्ञानार्णवे पञ्चविंशतिपटलगता विषयाः ॥

जीवजातिस्थितिकथनं । कुलमाहात्म्यं । ऊर्ध्वाम्नायमन्त्रमाहात्म्यं । मन्त्रोद्धारध्यानन्यासाः । कुलद्रव्यनिर्माणं । पूजकलक्षणं । कुलद्रव्यादिसंस्कारश्च । वटुकादिबलिप्रदान, शक्तिलक्षण, तत्वत्रयस्वीकारकथनं ॥ उल्लासभेद, द्रव्यपात्रादिसङ्क्रम, बल्युद्वासनकाल, श्रीचक्रस्थितिकथनं । योग, योगीश, कुलभक्तार्चनफलकथनं ॥

Remarks:—

मातृकेयं प्राचीना कीटविद्धा च ॥

ஞானார்ணவம் என்பது ஒரு மாபெரும் தந்த்ர கிரந்தம். இதன் மற்றொரு பாகத்திற்கு குலார்ணவம் என்று பெயர். இந் நூலில் ஸ்ரீ விநாயகர். ஸூர்யன், தேவீ, பரமேசுவரன், விஷ்ணு ஆகிய பஞ்ச தேவதைகளின் முக்கிய மந்திரங்களும், அவர்களின் அவதார தேவதைகள் ஆவரண தேவதைகள், லோக தேவதைகள் இவர்களின் மந்திரங்களும், அவைகளின் ஸாதனா விதிகள், யந்திரங்கள், பிரயோக முறைகள், எல்லாம் கூறப் பட்டிருக்கின்றன.

ஞானார்ணவம் என்ற இச்சுவடியில் திரிபுரஸுந்தரீ வர்ணமாலை, ந்யாஸம், பாலாந்யாஸம், திரிபுரார்சநாவிதி, பலிப்ரதானம், பஞ்சஸிம்மாஸநவிதி, பன்னிரண்டு மந்திர பேதங்கள் அவைகளைச் செய்து ஸித்தியடைந்தவர்கள், பரிவாரார்சனம், ஸ்ரீசக்ரவிதி, ஸ்ரீசக்ர பூஜா விதி, பீஜத்ரயஸாதனம், ஹோமம் ஞாந ஹோமம், குமாரீ பூஜை, ஆதியஜநம், தீக்ஷாவிதி, தமநாரோபணம், பவித்ராரோபணம் முதலிய பல விஷயங்கள் கூறப்பட்டிருக்கின்றன. இவை யாவும் ஸ்ரீவித்யோபாஸகர்களுக்கு மிக முக்கியமானவைகள்.

குலார்ணவம் என்ற பின்பகுதியில் குளமாஹாத்மியம், தியானம், நியாஸம், குளதிரவிய நிர்மாணம், குளதிரவிய ஸம்ஸ்காரம், பூஜக லக்ஷணம், வடுகாதி பலி, சக்தி லக்ஷணம் தத்துவத்ரய ஸ்வீகாரம், யோகிசகுள பக்தார்சனம் முதலிய கௌளசாக்த விஷயங்கள் கூறப்பட்டிருக்கின்றன.

॥ ज्ञानार्णवम् ॥

GÑĀNĀRṆAVAM

ஞாநார்ணவம்

Supplemental No. 917. Burnell's No. 12151. Substance—Palm leaf. No. of leaves—49+1—50. Script—Telugu. No. of Granthas—1400. Incomplete.

Author— शिवायै शिवेनोपदिष्टम् ।

Beginning :

शुभमस्तु ॥ अविघ्नमस्तु ॥

ज्ञानानन्दमयं वन्दे सच्चिदानन्दमन्दिरम् ।
क्षित्यादिशिवपर्यन्ततत्वातीतपदद्वयम् ॥

End :

स गोघ्नो वा कृतघ्नो वा तस्करो वा शठोऽपि वा ।
विमुक्तस्सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति श्रीज्ञानार्णवाख्ये महातन्त्रे वैष्णवपीठप्रकरणे सकलराममन्त्र-साधारणयंत्रस्वरूपकथनं नाम एकविंशति(शत)तमः पटलः ॥

Subject :

अस्यां मातृकायां 80—121. पटलास्सन्ति । तत्र च— एकाक्षरादित्रयोविंशत्यक्षरान्ताः राममन्त्राः । राममाला । सीतालक्ष्मणभरतशत्रुघ्नहनूमन्मन्त्राः । रामगायत्री । ध्यानविधिः । रामकवचं । रामस्तोत्रं । सीतास्तोत्रं । राममहायन्त्रं । दशावरणद्वादशावरणपूजाविधिः इत्येते विषया भवन्ति । रामषडक्षरमन्त्रेषु परं 420. भेदा वर्तन्ते ॥ 122 पटले तु आदितः पङ्क्तित्रयमात्रं भवति ॥

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा झर्झरिता किञ्चित्किञ्चिद्भग्ननष्टपत्रभागा च ॥

இச்சுவடியில் ஒன்றுமுதல் இருபத்திமூன்று அக்ஷரங்கள் வரையுள்ள பல ராம மந்திரங்கள், 420 ஷடக்ஷர மந்திரங்கள், ஸீதை, லக்ஷ்மணன், பரதன், சத்துருக்னன், ஹனுமான் இவர்களின் மந்திரங்கள், ராமகவசம், ஸ்தோத்ரம், பூஜாவிதி முதலியன கூறப்பட்டிருக்கின்றன.

॥ क्रमरत्नमाला ॥

KRAMARATNAMĀLĀ

க்ரமரத்நமாலா

Supplemental No. 918. Burnell's No. 12152. Substance—Palm leaf. No. of leaves—137. Script—Grantha. No. of Granthas—2500. Complete.

Beginning :

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

End :

क्रमरत्नैस्तु नवभिः कलिता यजनावली ।
क्रमरत्नावलीत्युक्ता विदुषां कर्णभूषणम् ॥

Colophon :

क्रमरत्नमालायां नवमः पटलः ॥ करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । इति क्रमरत्नमाला समाप्ता ॥ शुभमस्तु ॥

Subject :

गोपालमन्त्रराजयजनरत्नं । साधारणविन्यासरत्नं । गोपालार्चनीयरत्नं । ध्येयार्चनीयरत्नं । संस्कृतरत्नं । गोपालाष्टाक्षराश्रितचिन्तारत्नं । सुप्रसन्नरत्नं । विनियोगरत्नं । एकोनषष्टिगोपालमन्त्रयजनक्रमरत्नं ॥ इति नवभिः रत्नपटलैः ग्रथितेयं क्रमरत्नमाला । ग्रन्थेऽस्मिन् नवोर्ध्वपञ्चाशन्मन्त्राः । तेषां सिद्धिक्रमः । यन्त्राणि । प्रयोगाश्च प्रतिपादिता भवन्ति ॥

Remarks:—

मातृकेयमतिप्राचीना कीटविद्धा । क्वचित्पत्रप्रान्तभागाः भग्ना नष्टाश्च ॥

இந்நூலில் ஒன்பது படலங்கள் இருக்கின்றன. அவைகளில் ஐம்பத்தொன்பது கிருஷ்ணமந்திரங்கள், அவைகளின் ஸித்திக்கிரமம், யந்திரங்கள், பிரயோகங்கள் இவை நன்கு கூறப்பட்டிருக்கின்றன. ஆக்கியோன் பெயர் நூலில் காணப் படவில்லை.

॥ क्रमरत्नमाला ॥

KRAMARATNAMĀLĀ

க்ரமரத்நமாலா

Supplemental No. 919. Burnell's No. 1253. Substance—Palm leaf. No. of leaves— अ क्ष 51+27=78. Script—Grantha. Same as in Ms. No. 12152.

Remarks:—

मातृकेयं अतिप्राचीना अत्यन्तं क्रिमिभक्षिता विशीर्णनष्टपत्रभागा च ॥

॥ आकाशभैरवकल्पभागः ॥

ĀKĀŚABHAIRAVAKALPABHĀGAḤ

ஆகாசபைரவகல்பபாகம்

Supplemental No. 920. Burnell's No. 12155. Substance—Palm leaf. No. of leaves—3. Script—Telugu. No. of Granthas—100. Incomplete.

Author— शिवायै शिवेनोपदिष्टः ।

Beginning :

... ... लक्षणं सर्वसाधकानामभीष्टदम् ।
ज्ञानदं भवजन्तूनां साधकानां शुभावहम् ॥

End :

भक्तजनवल्लभाय सर्गस्थितिसंहारकारणाय धकय धकय
सर्वशत्रूनुद्रेकयोद्रेकय विद्वेषय विद्वेषय + ॥

Colophon :

इति श्रीआकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे
शंकरेण विरचिते मन्त्रयन्त्रप्रयोगो नाम पञ्चमो(ध्यायः) ॥

Subject :

भूशुद्धिभूतशुद्ध्यादयः । महागणपतियजनक्रमः । प्रयोगाः ।
फलानि । आकाशभैरवमन्त्रः । माला च ॥ इति प्रथमा-
ध्याये मध्यमभागमारभ्य षष्ठाध्याये मध्यमभागान्ता विषयाः ॥

Remarks:—

मातृकेयं अतिप्राचीना कीटविद्धा भग्ननष्टपत्रभागा च ।

॥ आकाशभैरवकल्पः (शरभकल्पः) ॥

ĀKĀŚABHAIRAVAKALPAḤ

ஆகாசபைரவகல்பம்

Supplemental No. 921. Burnell's No. 12156. Substance—Palm leaf. No. of leaves—56. Script—Telugu. No. of Granthas—2500 Complete.

Author— शिवायै शिवेनोपदिष्टः ।

Beginning:

शुभमस्तु ॥ अविघ्नमस्तु ॥ शरभकल्पं ॥

श्रीमद्ब्रह्मणे नमः ॥ श्रीमद्गुरुचरणारविन्दाभ्यां नमः ॥

गुरुं गणपतिं देवीं भैरवं शरभेश्वरम् ।

नमस्कृत्य प्रवक्ष्यामि मन्त्रशास्त्र[स्त्रं] विभूतये ॥

End:

... ... वान्ताग्न्यादितत्वाप्रसवलयकरं भैरवं ब्रह्मकल्पम् ।

रम्यं मन्त्री समीक्ष्य स्वमतिविभवतो वर्णयित्वाऽऽत्मबोधं ॥

... ... ॥

Colophon:

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसाळुवपक्षिराजकल्पे अष्टसप्ततितमोऽध्यायः ॥ तत्सद्ब्रह्मार्पणमस्तु ॥

Subject:

'उत्साहप्रक्रमो नाम' इत्याद्याः 'शरभस्तुतिर्नाम' इत्यन्ताः 78 अध्याया वर्तन्ते तत्र च—

गणेशयजनं । आकाशभैरवयजनं । चित्रमालाख्याकाशभैरवमाला । अष्टकर्मप्रयोगाः । भोगमोक्षसारस्वतप्रयोगाश्चेति प्रथमः कल्पः ॥ ततः—आशुगारुडप्रयोगः कवचं च । ततश्च—शरभमन्त्रः । शरभाष्टकस्तोत्रं । माला । नानाप्रयोगाः । रक्षाभिषेकविधिः । सर्वदोषनिवर्तकबलिकर्मप्रयोगः । माया,

भद्रकालीप्रयोगाः । तैलांजनविधि । दुर्गाशूलिनीप्रयोगाः । शरभजगत्क्षोभणमन्त्रप्रयोगः । भैरव, सिद्धभैरव, बडवानल, दिक्पालक, व्याधि, मृत्यु, मन्त्रप्रयोगाः । शरभकवचं । कामराज, रक्तचामुण्डी, मोहिनी, द्राविणी, शब्दाकर्षिणी, सरस्वती, लक्ष्मी, माया, पुलिन्दिनी, शास्तृ, संक्षोभिणी, धूमावती मन्त्रप्रयोगाः । नदीतरणशरभमन्त्रप्रयोगः । पैत्योन्मादाग्निभयप्रशमनचित्रविद्यामन्त्रप्रयोगः । देशिकह्रीममन्त्रः । दुस्स्वप्ननाशनपाशविमोचनमन्त्रप्रयोगाः । शत्रुप्रशमनमृत्युप्रशमनगणपतिमन्त्रप्रयोगः । श्वेतार्कगणपतिप्रयोगः । सिद्धमूलिकासंग्रहप्रयोगः । काल, षण्मुख, भैरव, त्वरिता, वीरभद्र, बडवानलभैरव, ब्राह्मयाद्यष्टमातृ, मन्त्रप्रयोगाः । शरभस्तुतिश्चेत्येते विषयास्सन्ति ॥

Remarks:—

ஆகாசபைரவதந்திரம் என்ற நூல் மிகப்பெரியது. அதில் ஒரு சிறு பாகத்திற்கு ஆகாசபைரவகல்பம் என்று பெயர். இதற்கு சரபகல்பம் என்று மற்றொரு பெயர். இதில் அநேக சரபமந்திரங்கள், சரபகவசம் யந்த்ரம் பிரயோகங்கள் இவை கூறப்பட்டிருக்கின்றன. தவிர சரபதேவரின் ஆவரணபரிவார தேவதைகளாகிய, ஆகாசபைரவர், ஆசுகருடன், மாயை, காளீ துர்கை, சூலினீ, படபாநலன், வியாதி, மிருத்யு, ரக்தசாமுண்டீ, மோஹினீ, மஹாசாஸ்தா, தூமாவதி, அஷ்டமாத்ருக்கள், அஷ்டதிக்பாலகர்கள், இவர்களின் மந்திரங்களும் அவைகளின் பிரயோகங்களும், அதனால் கிடைக்கும் பலன்களும் மற்றும் பல விஷயங்களும் தெளிவாகக் கூறப்பட்டிருக்கின்றன.

॥ प्रणवचिन्तामणिः ॥

PRAṆAVACINTĀMAṆIḤ

ப்ரணவசிந்தாமணி

Supplemental No. 922. Burnell's No. 12157. **Substance—**

Palm leaf. No. of leaves—181. Script—Grantha. No. of Granthas—8000. Incomplete.

Author— शिवायै शिवेनोपदिष्टः ।

Beginning :

श्रीत्रिपुरसुन्दर्यै नमः ।

ध्रुवश्चासि ध्रुवमिदं ध्रुवाध्रुवमुदस्यते ।
ध्रुवस्य ध्रुव ... ... व एवावशिष्यते ॥

End :

तस्योपर्यादिमहाश्वेतवराहः ॥ वीक्ष्यष्टसु[?] संस्थितविवर(रा] धोपर्यपि च तस्य दन्तयोरग्रे । पञ्चाशत्कोटियोजनविपुलतलातलमहादिव्यवृत्तभूलोकः ॥

Colophon :

इति श्रीमद्ब्रह्माण्डदीपिकायां पारमहंस्यां प्रणवदीपिकायां हर गौरीसंवादे श्रीमत्प्रणवचिन्तामणौ साङ्गप्रणवप्रतिपादकायुतावयवनिरूपणं नाम अष्टमं प्रकरणम् ॥

Subject :

Leaves	1—26	विराट्प्रणवनिरूपणं नाम प्रथमं प्रकरणं ।
,,	26—45	उत्पत्तिप्रणवनिरूपणं नाम द्वितीयं प्रकरणं ।
,,	46—54	महावाक्यप्रणवनिरूपणं नाम तृतीयं प्रकरणं ।
,,	55—70	प्रणवयन्त्रनिरूपणं नाम चतुर्थं प्रकरणं ।
,,	71—92	अष्टमात्राप्रणवनिरूपणं नाम पञ्चमं प्रकरणं ।
,,	92—100	नादप्रणवनिरूपणं नाम षष्ठं प्रकरणं ।
,,	100—123	शतावयवसहस्रावयवप्रणवनिरूपणं नाम सप्तमं प्रकरणं ।
,,	123—130	साङ्गायुतावयवप्रणवनिरूपणं नाम अष्टमं प्रकरणं ।
,,	131—181	जीवन्मुक्तलक्षणं नाम (असमाप्तं) नवमं प्रकरणं । नवमे प्रकरणे ब्राह्मणलक्षणे कियानिव भागो विद्यते ॥

Remarks:—

मातृकेयमतिप्राचीना कीटविद्धा च ॥ 1—8 प्रकरणानि समग्राणि । नवमं तु असमग्रम् ।

॥ मन्त्रचिन्तामणिः [मातङ्गीकल्पः] ॥

MANTRACINTĀMAṆIḤ

மந்த்ரசிந்தாமணி

Supplemental No. 923. Burnell's No. 12158. Substance—Palm leaf. No. of leaves-26. Script —Grantha & Telugu. No. of Granthas—800. Incomplete.

Author— भैरवोपदिष्टः ।

Beginning :

अथाहं संप्रवक्ष्यामि महाश्यामामभीष्टदाम् ।
सिद्धमातङ्गिनी नाम्ना दुर्लभं [भां] भुवि देवतैः [देवतां] ॥

End :

निधिं देहि नित्यं देहि योगं देहि रसायनं देहि ह्रां + ह्रः हंससोहंकमससमंकठेस्वह सलुमंकलेस्वह [हंसः सोहं सोहं हंसः सर्वमङ्गळे स्वाहा सर्वमङ्गळे स्वाहा]

Colphon:

इति मन्त्रचिन्तामणौ षष्ठोऽध्यायः (in leaf No. 5)

Subject :

Leaves 2 ஸம்ஸ்கிருதம், தெலுங்கு, தமிழ், லிபி கலந்தது. ஹிந்துஸ்தாநீமந்த்ரம், சரபமந்த்ரம்

1—5 सिद्धमातङ्गीमन्त्रः । ध्यानं । पुरश्चर्या । संपत्प्रयोगः । काम्यप्रयोगाः । पूजाविधिश्चेति 1—6 पटलगता विषयाः ॥ ततः——

6—24 पूजाविधिः । सावरणमातङ्गीयन्त्रपूजाविधिः । शान्तिस्तवः । अष्टोत्तरशतनामस्तोत्रं । कवचं । तर्पणं ।

न्यासाः । पीठपूजा । यन्त्रार्चनं । काम्यहोमाः । हसन्तीमन्त्रः (मातङ्गया वेत्रवती) शारिका, शुक, वीणा, वेणु, मन्त्राः । तेषां यजनस्थानानि । पञ्चबाण, राजमातङ्गी, मोहिनी, उच्छिष्टचाण्डाली, नवनाथोपेतपञ्चाक्षर, भुवनेश्वरीहृदयमाला, मन्त्राः ॥ शिवस्तुतिः । श्यामलानवरत्नमाला । विषहर आन्ध्रभाषामन्त्राः । निद्रायां रक्षाकर उच्छिष्टगणपतिमाला । दक्षिणकाली , कालीमन्त्राः ॥ उच्छिष्टचाण्डालीमन्त्रान्तं मातङ्गीकल्पः ॥

Remarks:—

मातृकेयमतिप्राचीना कीटजग्धा भग्ननष्टपत्रप्रान्ता च ॥

॥ सौभाग्यरत्नाकरः ॥

SAUBHĀGYARATNĀKARAḤ

ஸௌபாக்யரத்நாகரம்

Supplemental No. 924. Burnell's No. 12159. Substance—Palm leaf. No. of leaves—63 Script—Telugu & Grantha. No. of Granthas—2500. Incomplete.

Author— श्रीविद्यानन्दनाथः ।

Beginning :

शुभमस्तु ॥

प्रारंभे भरणे भंगे यन्मदस्पन्दबिन्दवः ।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम् ॥

End :

दक्षदोर्मूले धं दं सहस्रकोटिपितृकुलसेवितायै रौद्र्यंबा० ॥ वामे धं नं सहस्रकोटिगणेश्वर + + ॥

Colophon :

इति सच्चिदानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्दनाथेन विरचिते सौभाग्यरत्नाकरे अष्टमस्तरङ्गः ॥

Subject :

Leaves 1 शरभमाला, उच्छिष्टगणपतिमन्त्रश्च ।

,, 24 59=36 सौभाग्यरत्नाकरे 1—9 पटलान्तो भागः ।

,, 1—11 सौभाग्यरत्नाकरभागः ।

,, 1-15 धर्मशास्त्रे संकीर्णविषयाः । अनुपनीत, रूढ, आहिताग्नि, ब्रह्ममेध, संस्कारविधयः ॥

Remarks:—

मातृकेयमतिप्राचीना कीटविद्धा क्रमेण प्रतिविषयं विभिन्नपत्रा च ॥

॥ सौभाग्यलक्ष्मीकल्पः ॥

SAUBHĀGYALAKṢMĪKALPAḤ

ஸௌபாக்யலக்ஷ்மீகல்பம்

Supplemental No. 925. Burnell's No. 12160. Substance—Palm leaf. No. of leaves—9. Script—Grantha. No. of Granthas—300 Incomplete.

Author— लक्ष्मीविष्णुसंवादात्मकः ।

Beginning :

... ... तद्वृन्दैः पूजितं भक्तकामदं ।

नारदादिसुरर्षीणां स्तवाकर्णनतत्परम् ॥

End:

चारुस्मेराननां बालां चन्द्ररेखावतंसकाम् ।

वीणागानविनोदज्ञां ध्यायेन्मतङ्गतनयां [मातङ्गकन्यकां] ॥

Colophon :

इति सौभाग्यलक्ष्मीकल्पे चतुर्लक्षग्रन्थविस्तारे नामसारस्तमो (बो) नाम दशमः पटलः ॥

Subject :

श्यामलासहस्रनामस्तव इव भाति ॥

Remarks :—

मातृकेयं अतिप्राचीना कीटजग्धा भग्ननष्टपत्रैकदेशा च । सौभाग्यलक्ष्मीकल्पे दशमपटलमात्रम् ।

॥ सांख्यायनतन्त्रादयः ॥

SĀṄKHYĀYANATANTRĀDAYAḤ

ஸாங்க்யாயநதந்த்ரம் முதலியவை

Supplemental No. 926. Burnell's No. 12161. Substance—Palm leaf. No. of leaves—198. (1—86+108—196+2=198). Script—Telugu. No of Granthas—6500.

Author— शिवस्कन्दसंवादात्मकम् ।

Beginning:

यां कल्पयन्त्यश्विनौ ऋषिः । कृत्यानुष्टुप् । शीर्षण्वती इत्यग्निः । कृत्यानुष्टुप् ॥

End:

अत्यन्तं नाशमुपगतोन्तिमभागः ॥ अतो नावबुध्यते ॥

Colophon:

